M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref.
Ser. A/10

Title : Nyaya Siddhant Manjari

Nyāya Siddhānta Manjari
by
Jānaki Nātha Sharman

V/10

	Nyaya Siddhant Manjari	Title
	Janaki Nath Sharma	Author
		Editor
		Year, Vols.
8K		Publisher
V/10	Presented by Prof. V. R. Trivedi	Remarks

न्यायसिद्धांतमंजरी

॥श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ प्रणम्य परमात्मानं जानकीनाथशर्मणा॥ क्रियते युक्तिमुक्ताभिर्न्याय
सिद्धांतमंजरी॥१॥ इह खलु निखिललोकविमोक्षमुख्योपायं मननोपायमात्मनस्तत्त्वज्ञानमामनंति।
तच्च प्रमाणाधीनमिति प्रमाणं निरूप्यते॥ तत्र प्रमायाः करणं प्रमाणं॰ प्रमा च यथार्थानुभवः तदु
क्तमाचार्याः। यथार्थानुभवो मानमिति। ननु किमिदं याथार्थ्यं किं चानुभवत्वं। उच्यते। तद्वति तदवगाहि
त्वं याथार्थ्यं। भवति हि रजते इदं रजतमिति ज्ञानं रजतत्ववति तदवगाहीति यथार्थं॰ शुक्ताविदं रज
तमिति ज्ञानं च न रजतत्ववति तदवगाहीति न यथार्थं। न चैवं रजते इदं रजतं न वेति संशयोऽपि प्र
मा स्यादिति चेत्। रजतत्वांशे प्रमैव। तद्वति तदनुभवस्त्वप्रमेति प्रामाणिकाः॥ ननु शाखावच्छे
देन कपिसंयोगवति वृक्षे मूले कपिसंयोगीति प्रत्ययोऽपि प्रमा स्यात्। कपिसंयोगवति वृक्षे तदवगा
हित्वादिति चेत्। वृक्षे कपिसंयोगः प्रमैव। मूलेऽवच्छेदकत्वप्रत्ययस्तु न तथा। तस्य तदनवच्छेदकत्वात्॥
स्मृतिभिन्नज्ञानत्वमनुभवत्वं। जातिविशेषो वा। अनुभवामीत्यनुगतप्रतीतेर्बाधकं विना जातिविषयत्वात्।

गत्यप: २ १

न वा घटप्रभासंयोगाद्यः उद्भूतस्पर्शवन्मात्रवृत्तित्वात्। तत्र हि अनुद्भूतस्पर्शादयो वर्तंते। न च योग्यद्रव्यसमवे
ते। जातिश्च योग्यवृत्तिर्गता। समवायश्च मीमांसकानां सिद्धः॥ ॥महदुद्भूतस्पर्शवद्द्रव्यत्वेनैव त्वचो योग्यता। लाघवा
त्। न तु उद्भूतरूपमपि तत्र योजकं। गौरवात्॥ अतो वायुरपि त्वाच(?)प्रत्यक्षः॥ न च बहिरिंद्रियजन्यद्रव्यसाक्षा
त्कारत्वावच्छेदेन उद्भूतरूपस्य हेतुत्वात्॥ वायोस्तदभावान्नैवमिति वाच्यं॥ लाघवात् द्रव्यचाक्षुषत्वावच्छे
देन तद्धेतुत्वादित्याहुः॥ ॥वैशेषिकास्तु॥ ॥स्पर्श(?) वायोर्न प्रत्यक्षः॥ संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य
हेतुत्वात्॥ कथमन्यथा घटाकाशसंयोगोऽपि न प्रत्यक्षः॥ न च समवायस्य सर्वेऽप्याश्रयाः प्रत्यक्षाः॥ परमा
ण्वादेरयोग्यत्वादित्याहुस्तन्न॥ तथाहेतुतायां मानाभावात्॥ न च घटाकाशसंयोगस्याप्रत्यक्षतापत्तिः॥ योग्य
मात्रसमवेतस्य गुणस्यैव योग्यत्वात्॥ किंच॥ लाघवात् संयोगप्रत्यक्षत्वावच्छेदेन यावदाश्रयप्रत्यक्षस्य कारणतेत्युच्यते॥
न तु संबंधप्रत्यक्षत्वावच्छेदेन। संबंधत्वं हि संयोगसमवायान्यतरत्वमिति गौरवात्॥ घ्राणयोग्यो महत्त्वसमानाधिकर
णोद्भूतो गंधः॥ तद्वृत्तिसामान्यं तयोः समवायः॥ अत एव परमाणुगंधो न गृह्यते॥ महत्त्वासमानाधिकरणत्वात्॥ न वा घ्रा
णवज्रादिगंधः॥ अनुद्भूतत्वात्॥ रसनायोग्यो महत्त्वसमानाधिकरणोद्भूतो रसः॥ तद्वृत्तिसामान्यं तयोः समवायः॥ तेन
परमाणुरसो न गृह्यते॥ महत्त्वासमानाधिकरणत्वात्॥ न वा मण्यादिरसः॥ अनुद्भूतत्वात्॥ श्रवणयोग्यः शब्दः॥ तद्वृ
त्तिर्जातिः तयोः समवायः॥ इति संक्षेपः॥ ॥ तस्य चेंद्रियस्य संनिकृष्टार्थग्राहकत्वात् संनिकर्षाः सहकारिणः॥ ॥

न्या॰ मी॰

तेषु ॥ संयोगः ॥ संयुक्तसमवायः ॥ संयुक्तसमवेतसमवायः ॥ समवायः ॥ समवेतसमवायः ॥ विशेषणता च ॥ अथ केन संनि-
कर्षेण किं गृह्यते ॥ द्रव्यं संयोगेन गृह्यते ॥ शब्देतरगुणकर्मद्रव्यगता जातिः संयुक्तसमवायेन ॥ भवति हि घटादिकं चक्षु-
रादिसंयुक्तं ॥ तत्र समवेतं रूपादि स्पर्शो जातिश्च द्रव्यत्वादिः ॥ शब्देतरगुणकर्मगता जातिः संयुक्तसमवेतसमवायेन ॥ भ-
वति हि चक्षुरादिसंयुक्तं घटादि तत्समवेतं रूपादिः तत्र समवायो रूपत्वादेः ॥ शब्दः समवायेन गृह्यते ॥ कर्णशष्कुल्य-
वच्छिन्ननभसि शब्दस्य समवायात् ॥ शब्दगता जातिः समवेतसमवायेन ॥ श्रवणसमवेते शब्दे शब्दत्वस्य समवाया-
त् ॥ विशेषणतया समवायो ऽभावश्च ॥ तत्र संयोगसमवाययोरभावात् ॥ सा च विशेषणता द्विधा ॥ इंद्रियविशेषणता
इंद्रियसंनिकृष्टविशेषणता च ॥ तत्र इंद्रियविशेषणतया शब्दाभावो गृह्यते ॥ इंद्रियरूपश्रवणे तस्य विशेषणत्वात् ॥
इंद्रियसंनिकृष्टविशेषणतया भूतलादौ घटाभावादिः ॥ इंद्रियसंनिकृष्टे भूतले तस्य विशेषणत्वात् ॥ इंद्रिय-
संनिकृष्टविशेषणतापि बहुधा ॥ संनिकर्षस्य बहुत्वादवसेया ॥ ननु संयोगेन प्रत्यासत्तिः ॥ संयुक्तसमवायेन
बि॰ ९ घटादिग्रहसमवायाः ॥ इंद्रियसंयुक्ते कपालादौ तेषां समवायात् ॥ मैवं ॥ आत्मनि तदसंभवात् ॥ तत्समवेतत्वा-
दिति संक्षेपः ॥ स्यादेतत् ॥ अंधकारस्थघटादि किमिति चक्षुषा नोपलभ्यते ॥ संयोगप्रत्यासत्तेः सत्त्वात् ॥ उच्यते ॥
चक्षुषा द्रव्यग्रहे महदुद्भूतरूपालोकसंयोगाः सहकारी ॥ न चांधकारे सो ऽस्ति ॥ न च महदुद्भूतेति व्यर्थं ॥ तेन परमाणु-
चक्षुरादिसंयोगयोः सत्त्वात् ॥ नन्वेवं चक्षुषा तेजः प्रत्यक्षं न स्यात् ॥ तत्र तेजःसंयोगाभावात् ॥ प्रदीपे तत्र नालोकसं-
योगो ऽस्तीति चेन्न ॥ [illegible] प्रभादौ तदभावः ॥ दृश्यते चांधकारे चंद्रकांतमणिविशेषप्रभा ॥ अथालोकेतर ॥४॥

द्रव्यचाक्षुषं प्रति आलोकसंयोगः सहकारीति चेन्न ॥ महांधकारस्थवर्णरूपतेजःसाक्षात्कारापत्तिः ॥ अत्रोच्यते ॥ द्रव्यचाक्षुषमा-
त्रे आलोकसंयोगः सहकारी ॥ न चालोकचाक्षुषे व्यभिचारः ॥ आलोकाकाशसंयोगस्यालोके ऽपि सत्त्वात् ॥ तस्यापि द्रव्यत्वात् ॥ न चैवमं-
धकारेषु वर्णसाक्षात्कारापत्तिः ॥ अनभिभूतरूपालोकसंयोगस्यैव हेतुत्वात् ॥ सुवर्णरूपं तु अभिभूतं ॥ अन्यथा सुवर्णरूपालो-
कसंयोगात् द्रव्यचाक्षुषापत्तिः ॥ संप्रदायविदस्तु ॥ सुवर्णे नेत्रसंयोगश्चेत्तद्धि तद्द्रव्यचाक्षुषे आलोकसंयोगो हेतुः ॥ भवति च
सुवर्णमपि सुवर्णे भिन्नं तेजस्त्वाद्भिन्नमतस्तत्र आलोकसंयोगो हेतुः ॥ तेनांधकारे न सुवर्णसाक्षात्कार इत्याहुः ॥ तथापि पूर्व-
स्यां दिशि आलोकसंयोगवतः पश्चाद्दिक्संयुक्तस्यापि पादः परदिगवस्थितपुरुषस्य साक्षात्कारः स्यात् ॥ आलोकसंयोगस्य
पूर्वदिगवच्छेदेन सत्त्वात् ॥ मैवं ॥ यदवच्छेदेनालोकसंयोगस्तदवच्छिन्नचक्षुःसंयोगस्य हेतुत्वात् ॥ इह च तदभावात् ॥ स्यादेतत् ॥
विशेषणता न प्रत्यासत्तिः ॥ समवायाभावयोरवास्तवत्वात् ॥ नहि तयोर्मानमस्ति ॥ अयं घटः अयं रूपवान् ॥ अयं चलति ॥ तत्र
घटसमवेतघटत्वरूपचलनसंबंधविषयकं समवायमानं ॥ न हि घटादीनां तेषामन्यः संबंधो ऽस्तीति चेन्न ॥ स्वरूपसंबंधस्यैवाधारा-
धेयभावाख्यस्य सत्त्वात् ॥ न हि समवाय एव घटत्वस्याधारता ॥ पटादावपि सत्त्वात् ॥ एक एव घटत्वपटत्वयोः समवायः ॥ मैवं ॥
घटे घटत्वं समवेतं रूपं च समवेतं तंतुषु पटः समवेतः ॥ इह कर्म समवेतमित्यनुगतसमवायाकारप्रतीत्या तत्सिद्धेः ॥ नाभा-
वो ऽसमवेतो घटो नास्तीति प्रतीत्या तत्सिद्धेः ॥ अत्र प्रभाकराः ॥ नाभावो ऽधिकः ॥ किंतु केवलाधिकरणस्वरूप एवातः किं तत्प्र-
त्यायप्रत्यासत्त्यंतरकल्पनेन ॥ ननु किमिदं कैवल्यं ॥ भूतलस्वरूपं चेत् ॥ सघटभूतलस्यापि तत्त्वापत्तेः ॥ घटाभाववत्त्वं चे-

न्या॰मं॰ क्लिप्तं॥ अभावेनेति चेन्न॥ यत्राधिकरणे न वह्निरभावो गृह्यते तदधिकरणस्याभावत्वांगीकारात्॥ न चास्मिन्देश आधाराधे
यभावानुपपत्तिर्घटाभावे घटो नास्तीति प्रतीतेः॥ अभेदेपि स्वाधाराभावतथाभावांगीकारात्॥ न चान्य एव घटाभावे घटा
भावः॥ अनवस्थापत्तेः॥ अप्रसिद्धत्वाच्च॥ अत्रोच्यते भूतलविशेषो घटाभावः तदा भूतले घटाभाव इति आधा
राधेयप्रत्ययो न स्यात्॥ न हि भूतले भूतलाधिकरणं। भूतले भूतलमिति प्रतीत्यापत्तेः॥ किंच यत्रेदानीं घट आनीतः त
दधिकरणे घटाभावो न वा॥ आद्ये इदानीं घटो नास्तीति प्रत्ययः स्यात्॥ अंत्ये अन्यदापि घटो नास्तीति प्रत्ययो न स्यात्॥
किंच कपाले घटो भविष्यति घटो नष्ट इति प्रतीतेरस्ति कपाले एवं घटप्रागभावः उत्तरकाले घटध्वंसः स यदि कपा
लमात्रं तदा सर्वदा तत्प्रतीतिः स्यात्॥ कपालस्य सत्त्वात्॥ अन्यथा कपालप्रतीतिरपि न स्यात्॥ किंचैवं मोक्षो दुःखाभा
वात्मरूपः स्यात्॥ तथा चात्मासाध्यतापत्तिः॥ नित्यत्वादिति संक्षेपः॥ स्यादेतत्॥ एवं घटाभावो नास्तीति प्रतीत्या घ
टाभावाभावोऽपि अधिकः स्यात्॥ स्यादेवेति चेत्॥ तर्हि तदभावोऽप्यधिकः स्यादित्यनवस्था॥ केनाधिकरणेन तदभा
वाभावोस्ति तदधिकरणेन॥ भेदे तु उक्तदूषणगणप्रसंगश्चैवं स्यात्॥ अत्राहुः॥ घटाभावाभा
व इति चेत्॥ तर्हि सर्वत्र भूतले घटाभावो नास्तीति प्रतीतेः॥ न चैकैवाधिकरणस्वरूप उभयत्रेति संक्षेपः॥ न च अस्तु॥ घटाभावाभावा
५४ वो घटे तत्र भूतले घटाभावो नास्तीति प्रतीतेः॥ न चायं भ्रमः॥ बाधकाभावात्॥ तदभावस्तु घटाभाव इति न त्वधिक इति नानवस्थानमि
धिक एव अभावत्वेन प्रतीतेः॥ न वा॥ अन्त्ये आधारातं भूतलमेव घटाभेद इत्यनेन॥ आद्ये तद्भेदोऽप्यधिकः स्या
त्पाठु॥ स्यादेतत्॥ भूतलं घटभेदेति तेन वा॥ अथानवस्था न याद्दद्भेदो नाधिकः॥ किंतु अधिकरण ॥५॥
रू॥ स्यादेवेति चेत्॥ तर्हि तद्भेदोऽप्यधिकः स्यादित्यनवस्था॥

रूप इति चेन्न॥ उक्तदूषणगणप्रसंगात्॥ अत्राहुः॥ भेदो भेदोऽप्यधिक एव॥ न चैवं तद्भेदोऽप्यधिकः स्यात्॥ इष्टत्वात्॥ न चेयमनव
स्था दोषाय प्रामाणिकत्वात्॥ सर्वत्रावलंबितस्य अन्यथानुपपत्तिरिति संक्षेपः॥ स चायमभावो द्विधा॥ अन्योन्याभावः
संसर्गाभावश्च॥ तत्र इदमिदं न भवतीत्येवमिति प्रतीतिसाक्षिकोऽभावोऽन्योन्याभावः॥ तदिदमाहुः॥ तादात्म्य
संबंधावच्छिन्नप्रतियोगिताकोऽभावोऽन्योन्याभावः॥ तदन्याभावः संसर्गाभाव इति॥ सोपि त्रिविधः॥ अत्यंताभावप्राग
भावप्रध्वंसाभावभेदात्॥ तत्र नास्तीत्यनुभवसाक्षिकोऽनित्यः संसर्गाभावोऽत्यंताभावः॥ विनंक्ष्यतीति प्रतीतिसाक्षिक
उत्पद्यमानभावः प्रध्वंसाभावः॥ स च न विनाशी॥ तद्विनाशके प्रमाणाभावात्॥ न हि विनाशो नष्ट इति कश्चि
त्प्रत्येति॥ तत्प्रागभावश्च घटादिरूपप्रतियोगी॥ तत्प्रागभावश्च उत्पत्त्यत्र ध्वंसो भविष्यतीति प्रतीतेः॥ विनाश्यभा
वः प्रागभावः॥ स च भविष्यतीत्यनुभवसाक्षिको दुरपह्नवः॥ तस्य ध्वंसप्रतियोगित्वं ध्वंसश्च॥ उत्पत्त्यत्र विनष्टप्रागभा
व इति प्रतीतेः॥ अत्यंताभावोऽन्योन्याभावश्च नित्यौ॥ नित्याभावो द्विविधः॥ एकमात्रवृत्तिधर्मावच्छिन्नप्रतियोगि
ताकोऽभावोऽन्यश्च॥ न चायं तथाभावः॥ घटवति घटपटौ न स्तः॥ घटो न घटपटौ॥ एकघटवति न घटौ॥ एको न घ
टवतीति प्रतीतेः॥ एकघटवति द्वित्वावच्छिन्नतदत्यंताभावस्य एकस्मिन्नुभयाभावस्य च सत्त्वात्॥ न च प्रतियोगिमति कथं
तदभावस्तत्त्वयोर्विरोधादिति वाच्यं॥ प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधित्वात्॥ न चैकद्वित्वावच्छिन्नः॥
एको द्वाविति प्रतीतेः॥ अत एव दशपुरुषादेक अपनीते सति दशपुरुषा नास्तीति धीः संगच्छते॥ द्विधाभावो विशेषण

न्युरू०

न्या॰मं॰ वच्छिन्नविशेष्यताकत्वरूपोऽभ्युपेयते॥ न चैवं दण्डाभावविषयादिदं वत्यपि तथाप्रतीतिः॥ न वा पुरुषाभावविषया॥
तस्य सत्त्वात्॥ तस्माद्यत्र विशेषणाभावो विशेष्याभावो उभयाभावो वा तत्र नो विशिष्टाभावो धिकः॥ अतिप्रसंगः॥ भाट्टा
स्तु॥ अभावो नेन्द्रियग्राह्यः॥ अतु समं सन्निकर्षाणामभावात्॥ किं त्वनुपलब्धिरूपप्रमाणगम्य एव इत्याहुः॥ तन्न॥ प्रमा
णान्तरकल्पनातः सन्निकर्षान्तरकल्पनाया लघुत्वात्॥ अन्यथा संयोगादीनां ज्ञानां सन्निकर्षाणामभावात्प्रश्र
श्रूपि प्रमाणान्तरकल्पनापत्तेः॥ तच्च शब्दं साक्षात्करोमीति प्रतीतेः प्रत्यक्षमेवायमिति चेत् इहापि घटाभावं पश्यामीति
= प्रत्यक्षखं प्रतीतेरप्येवं सत्य इति तुल्यं॥ किं चानुपलब्धेः प्रमाजनने व्यापाराभावात् कथं प्रमाकरणत्वं व्यापारवत्कारणं कर
णमिति स्फुटं॥ ननु एवं घटाभाववति घटोपलब्धावपि घटाभावप्रत्ययः स्यात्॥ इन्द्रियसंबद्धविशेषणतायाः सत्त्वादिति
चेन्न॥ योग्यानुपलब्धेरप्यभावग्रहहेतुत्वात्॥ अधिके संयोगानुपलब्धिः॥ ॥योग्यस्य प्रतियोगिनोऽनुपलब्धिः सहका
रिणीति चेन्न॥ जलपरमाणौ पृथिवीत्वाभावग्रहापत्तेः॥ न वा तर्हि पृथिवीसंबद्धचक्षुःसंयोगः॥ तदनुपलब्धिश्च उलप
भे८४ रूपाणो॥ स्तंभे पिशाचाभावग्रहानापत्तेश्च॥ पिशाचस्य प्रतियोगिनोऽयोग्यत्वात्॥ अथ योग्याधिकरणे प्रतियोगि
नोऽनुपलब्धिः सतीति चेन्न॥ तत्र पिशाचात्यन्ताभावग्रहापत्तेः॥ यत्र तु अत्यन्ताभावग्रहे योग्ये प्रतियोग्यनुपल
ब्धिः॥ अन्योन्याभावग्रहे च योग्ये अधिकरणे प्रतियोगितादात्म्यानुपलब्धिः सहकारिणीति मतेन तन्न॥ जलपरमाणौ
पृथिवीत्वात्यन्ताभावग्रहापत्तेः॥ वायौ रूपवद्द्रव्यग्रहानापत्तेश्च॥ न चेष्टापत्तिः॥ अनुमानविरोधात्॥ अत्रान्या
ते॥ योग्यासहकारिसंप्रत्ययानुपलब्धिः कारणं॥ अत एवं नान्धकारे घटाभावेऽस्तु॥ ६॥

योग्यस्येति॥ तत्रालोकाधिकरणे सन्निकर्षस्यापि हेतुत्वात्॥ न वा जलपरमाणौ पृथिवीत्वाभावग्रहः॥ योग्यसन्निकर्षा
भावात्॥ ननु सन्निकर्षो योग्यः पृथिवीत्वाभावग्राहक इति चेत्॥ इन्द्रियसन्निकृष्टमहत्त्वोद्भूतरूपवद्विशेषणता॥ उ
द्भूतरूपवत्त्वाभावेऽपि इन्द्रियसन्निकृष्टमहत्त्ववद्विशेषणतायाः योग्यसन्निकर्षः॥ अतो मनसि न तद्ग्रहः स्यात्॥ न वा तिच
महति वायौ वेदं॥ अन्यत्रापि योग्याः सन्निकर्षाः कार्यवशादुन्नेयाः॥ पिशाचात्यन्ताभावस्तु अयोग्यत्वादेव न गृह्यते॥
कापुनरत्र तावद्योग्यता॥ योग्यमात्रप्रतियोगिकत्वं योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं॥ एवमन्यत्रापि स्वानुभवा
नुसारेण योग्यता वाच्या॥ सर्वाभावसाधारणं किं योग्यत्वमिति चेन्न किंचिदिति गृहाण॥ न तथाप्येवं नानाभावयोग्यता
इति चेत् न॥ गुणयोग्यता वत्॥ अननुगतस्यैव तत्त्वादिति संक्षेपः॥ ॥ अथ किमिदं चक्षुरादि॥ तेऽत्र समिन्द्रियं रूपग्रा
हकं॥ महदिन्द्रियं वा चक्षुः॥ वायवीयमिन्द्रियं स्पर्शग्राहकं॥ महदिन्द्रियं वा त्वक्॥ आप्यमिन्द्रियं रसग्राहकं॥ महदिन्द्रियं
वा रसनं॥ पार्थिवमिन्द्रियं गन्धग्राहकं॥ महदिन्द्रियं वा घ्राणं॥ महत्पदं मनोवारणाय॥ कर्णशष्कुल्यवच्छिन्नं नभः॥ महदि
न्द्रियं शब्दग्राहकं वा श्रोत्रं॥ निस्पर्शमणुमनः॥ निस्पर्शपदं पार्थिवाद्यणुवारणाय॥ अणुपदं विभुवारणाय॥ अत्र म
नसः॥ ॥ मनो नाणु॥ किंतु विभु निस्पर्शद्रव्यत्वात्॥ आत्मवत्॥ मनस्त्वं चात्मान्यत्वे सति ज्ञानासमवायिद्वार
णं योगाश्रयत्वमित्याहुः॥ तन्न॥ विभुत्वे आत्मना संयोगानुपपत्तेः॥ द्विविधः संयोगः कर्मजः अजश्च॥ उभयवत्संयोगजश्चेति॥
न च विभुत्वात्॥ आत्मनः कर्मास्ति॥ मनोऽपि यदि विभु तदा तस्यापि कर्माभावात्॥ अतः कर्मजसंयोगासंभवः॥ न च

सि° मं° तयोरवयवयोरस्ति। येन तत्संयोगजसंयोगः स्यात्॥ न च नित्ययोरेव विभुनोः संयोगः॥ अजसंयोगनिरेधात्॥ युक्तो निषेध
इति चेत् मानाभावात्॥ संयोगस्यावच्छेदकत्वेन व्याप्यजन्यत्वावधारणाच्च॥ अप्रयोजकं चैतदनुमानमिति संक्षेपः॥ ॥इति
श्रीतार्किकचूडामणिभट्टाचार्यविरचितायां सिद्धान्तमञ्जर्यां प्रत्यक्षपरिच्छेदः॥ ॥अथानुमानं निरूप्यते॥ तत्रानुमि
तिकरणमनुमानं॥ अनुमितित्वं चानुमिनोमीत्यनुव्यवसायसिद्धो जातिविशेषः॥ जन्यज्ञानजन्यत्वाव्यभिचारि जन्य
शब्दधीजन्यत्वव्यभिचारि जातिमदनुव्यवसायमनुमितित्वं वा॥ प्रत्यक्षत्ववारणाय जन्यज्ञानजन्यत्वाव्यभिचारी
ति॥ ज्ञानाजन्ये नित्ये निर्विकल्पके च तद्व्यजन्यत्वव्यभिचारीति॥ तत्रापि प्रथमजन्यपदं चाक्षुषत्वादिवारणा
य॥ तद्धीश्वरज्ञानजन्यत्वाव्यभिचारि। सर्वेषां तदाश्रयाणामीश्वरधीजन्यत्वात्॥ उपमितित्ववारणाय
व्यभिचारीत्यन्तं॥ तद्धि न यथोक्तज्ञानजन्यत्वव्यभिचारि। उपमितौ नामन्योऽसौ शब्दविषयकोऽतिदेशवाक्या
र्थज्ञानजन्यत्वात्॥ शाब्दानुभवो नापि चैषां शब्दज्ञानजन्यत्वात्॥ न च शब्दज्ञानजन्यत्वव्यभिचारीति समस्य
र्थज्ञानजन्यत्वात्॥ न चानुमितित्वस्येश्वरीयशब्दज्ञानजन्यत्वाव्यभिचारित्वे नासंभवात्॥ न च मोक्षजनकतावच्छेदके
॥ अनुमितित्वस्य ईश्वरीयशब्दज्ञानजन्यत्वाव्यभिचारि तत्रापि संभवात्॥ न च मोक्षजनकतावच्छेदक
तत्त्वज्ञाने वृत्तिसामान्ये जन्यज्ञानजन्यमात्रवृत्तित्वमिति व्याप्तिः॥ तस्य शब्दविशेषविषयकमननजन्य ॥७॥
मात्रवृत्तित्वेन जन्यशब्दज्ञानजन्यत्वाव्यभिचारित्वात्॥ जातिपदं वा मानसमात्रवृत्तिपरं॥ अत एव भक्ति
= युक्तो यः अधेस्यास्य युक्तिरिति नचितनम्

शब्दादेर्नुदासीः॥ अनुमव्यपदेशस्मृतिवारणायेति दिक्॥ ननु किमिदं तत्करणमिति चेत्॥ व्याप्तिविशिष्टपक्षधर्मताघटकलघुप
दार्थज्ञानमिति गृहाण॥ ननु केयं व्याप्तिः॥ न तावत्साध्याभाववदवृत्तित्वं॥ पर्वतीयवह्न्यभावविशिष्टधूमस्य सत्वात
नापि साध्यवदन्यावृत्तित्वं॥ वह्निमत्पर्वतान्यमहानसवृत्तित्वाद्धूमस्य॥ अथ साध्यवत्त्वावच्छिन्नान्योन्याभाववदवृत्तित्वे
विवक्षितं॥ न च धूमवति वह्निमत्त्वावच्छिन्नान्योन्याभावो वर्तते॥ धूमवान्न वह्निमानित्यप्रतीतेरिति चेन्न॥ केवलान्वयिसाध्य
काव्याप्तेः॥ अत्र मीमांसकाः॥ केवलान्वयिसाध्यकमनुमानमेव नास्ति केवलव्याप्तिरयं कारणत्वात्॥ तन्न॥ इदमपत्यम
नुमिनोमीत्यनुव्यवसायापत्तेः॥ न च कारणबाधात्तथानुभूतिरियं॥ व्यभिचारेण तत्र कुतः कारणत्वासिद्धेः॥ सो गतास्ति॥ केवला
न्वयिनि साध्यवदन्यत्वमेवासत्त्वात्तद्व्याप्तिसिद्धं तदघटितज्ञानादेवानुमितिरित्याहुः॥ तन्न॥ अप्रसत्त्वातरासिद्धेः॥
कि च तत्र यत्र साध्ये केवलमपि अव्याप्तिर्दुर्वारा॥ न स्वजीकमन्ये यं न वह्निरिष्यते॥ अन्ये तु कार्त्स्न्येन संबंधो व्याप्तिरित्याहुः॥ तत दर्पे ८
= दर्पे ५ न्न॥ तत्र वदंति॥ कोऽयं कार्त्स्न्येन संबंधः॥ कृत्स्ने न साध्ये न हेतोः संबंधः॥ कृत्स्ने हेतौ साध्यसामानाधिकरण्यं वा॥ कृत्स्ने हेतुम
ति साध्यवत्त्वं वा नाद्यः॥ प्रसिद्धानुमाने व्याप्तेः॥ नहि धूमस्य सकलवह्निसामानाधिकरण्यमस्ति॥ अयः पिंडवह्नेः सामानाधि ५४
करण्याभावात्॥ न द्वितीयः॥ एकव्यक्तिकहेतावव्याप्तेः॥ न तृतीयः॥ एकमात्रव्यक्तिकहेतावव्याप्तेः॥ अत्रोच्यते॥ साध्यस
मानाधिकरणस्य समानाधिकरणयावत्त्वं व्याप्तिः॥ समानाधिकरणो यावन्तः साध्यसमानाधिकरणास्तत्त्वे व्याप्तिरिति
यावत्॥ भवति च धूमसमानाधिकरणो यावन्तो वह्निसमानाधिकरणा इति धूमे वह्नि व्याप्तिः॥ न तु वह्नौ धूमस्य॥ नहि वह्नि

प० मं०

समानाधिकरणं यावन्तो धूमसमानाधिकरणाः॥ अयःपिण्डस्य वह्निसमानाधिकरणस्य धूमसमानाधिकरणत्वात्॥ प
द्विशिष्टसमानाधिकरणाः यावन्तः साध्यसमानाधिकरणास्तद्वत्त्वं वा॥ नवृत्तिश्च धूमत्वविशिष्टसमानाधिकरणा याव
न्तो वह्निसमानाधिकरणास्तद्वत्त्वं धूमे॥ न च दृष्टधूमप्रतिवह्नित्वं नानावह्नौ धूमव्याप्तिः॥ अस्ति चार्द्रेके वर्जोन्येपिनि॥
= त्व४ अभिधेयत्वविशिष्टसमानाधिकरणो न यावन्तो मेयत्वसमानाधिकरणत्वात्॥ एवं च लाघवात् साध्यवदन्यावृत्तित्वे
सति साध्यसमानाधिकरणत्वं व्याप्तिः॥ न चेदं केवलान्वयिन्यस्ति॥ अतो नेदमनुमानमिति मीमांसकमतमपा
तो धमस्य न / नुमानाद् स्तं। अत्र चार्वाकाः॥ न विविधं व्याप्तिः॥ न च यं शक्यत्राहा किंचिद्धूमसमानाधिकरणे वह्निसमानाधिकरणे न वि
ष्यतीति शंकायाः दुर्वारत्वात्॥ न चेदृशशंकायां व्याप्तिनिश्चयो भवितुमर्हति॥ तस्याः शंकायाः प्रतिबन्धकत्वात्॥ न च भू
योदर्शनात्तन्निवृत्तिः॥ शतशः सहचरितयोरपि व्यभिचारोपलब्धेः॥ न च तर्कात्तन्निवृत्तिः॥ तर्कस्य व्याप्तिनिश्चय
मूलकत्वेनानवस्थानात्॥ इत्थं च ग्राहकाभावात् व्याप्तेरग्रहे कुतोऽनुमानं स्यादिति तन्न॥ व्यभिचारज्ञानविर
हादिकमेव व्याप्तिग्राहकं॥ न च तच्छंकाविरहो दुःशकः॥ क्वचित्तर्कात्॥ क्वचिन्न स्वत एव व्याप्यादेः कोटिस्मर
णाद्यभावादपि तन्निवृत्तेः॥ न हि सर्वदा व्यभिचारशंकाकोटिस्मृतिर्वा अस्ति॥ अनुपपत्तेवेति दिक्॥ ॥ ननु से
व्याप्तिर्दृष्टान्तवृत्तिधूमे गृहीता॥ न च पक्षीयेपि॥ तथा च कथं तदनुमितिः॥ पक्षवृत्तिधूमव्याप्तिग्रहस्यानुमितिहे औ० ॥त्वो
तुत्वात् इति चेत्। अत्राहुः॥ नकाव्याप्तिर्दृष्टान्तवृत्तिधूमे धूमत्वेन गृहीता पर्वते धूमं दृष्ट्वा स्मर्यते॥ ततो विशेषेण
सह चरितयोः पार्थिवत्वलोहलेख्यत्वयोर्मण्यादौ व्यभिचारदर्शनात्॥ ६॥

ज्ञानरूपात्तस्मादसति बाधके व्याप्तिविशिष्टत्वेन पक्षधर्मधूमज्ञानं जायते॥ यद्वा दृष्टान्ते व्याप्तिज्ञानं जायमानं धूम
त्वसामान्यलक्षणप्रत्यासत्त्या सकलधूमगोचरमेव जायत इति न दोषः॥ ननु सामान्यलक्षणप्रत्यासत्तिस्तदाश्रयसा
क्षात्कारजननी तदा विमुद्रितनयनस्यापि धूमत्वेन सकलधूमसाक्षात्कारः स्यादिति चेन्न॥ यतः सामान्यप्रत्या
सत्तिस्तत्प्रकारकलौकिकसाक्षात्कारजनकसामग्र्या अपि सामान्यलक्षणप्रत्यासत्तेः सहकारित्वात्॥ ननु व्याप्ति
ज्ञानस्यानुमितिहेतुत्वे यत्र धूमो वह्निव्याप्य इति ज्ञानं तत्रापि अनुमितिः स्यात्॥ न च पक्षवृत्तिधूमे व्याप्तिज्ञानं कार
णं॥ तच्चात्र नास्तीति वाच्यं॥ धूमत्वेन सामान्यलक्षणप्रत्यासत्त्या तेन सर्वत्रैव धूमे व्याप्तिज्ञानात्॥ न च हेतोः प
क्षधर्मताज्ञानमपि सहकारीति वाच्यं॥ धूमो वह्निव्याप्योऽयं पर्वतवृत्तीति ज्ञानादनुमित्यापत्तेः॥ इष्यते न
त्वेन पर्वते धूमज्ञानस्य सत्त्वात्॥ उच्यते॥ व्याप्यत्वेन प्रकारेण पक्षे हेतुनिश्चयोऽनुमितौ हेतुः॥ न तु व्या
प्तिज्ञानमात्रं॥ न च धूमो वह्निव्याप्योऽयं पर्वतवृत्तीति ज्ञाने व्याप्यत्वेन पर्वते धूममवगाहते येन ततोऽनुमि
तिः स्यात्॥ पर्वतो वह्निव्याप्यधूमवान्न वेति संशयादप्यनुमितिर्मा भूदिति निश्चयपदं॥ मीमांसकास्तु॥ व्या
प्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानं व्याप्तिज्ञानसहकारि॥ व्याप्यतावच्छेदकं च धूमत्वं तत्प्रकारेण व्याप्ति
ग्रहात्॥ न तु इदंत्वेनेत्यतोऽयं पर्वतवृत्तीति ज्ञानादनुमितिः॥ एवं धूमो वह्निव्याप्यो धूमवांश्चायं पर्वत इति ज्ञाने
ह्याद्नुमितिरित्याहुः॥ तन्न॥ व्याप्यत्वप्रकारकपक्षधर्मताज्ञानहेतुतायां लाघवात्॥ किं चैवं वह्निव्याप्य

न्या०सि० १०

वह्निरिति ज्ञानादनुमितिर्न स्यात्। धूमत्वेन पक्षधर्मतानवगाहनात्। तस्माद्वह्निव्याप्यवानित्येवंरूपा व्याप्तिविशि-
ष्टपक्षधर्मताज्ञानात्॥ तृतीयलिंगपरामर्शत्वेन प्रसिद्धाद् वानुमितिः॥ तृतीयत्वं कथमिति चेत्। प्रथमं दृष्टांते धू-
मदर्शनं। ततो व्याप्तिज्ञानं। ततस्तद्विशिष्टपक्षधर्मताज्ञानं इत्येवं क्रमेण गणनात्। तृतीयत्वं प्रायिकमित्यके-
न उते नक्रमेण हेतुत्वं गौरवात्॥ व्यभिचाराद्येति ध्येयं सोयं परामर्शो नानुमितेः करणं व्यापाराभावात्। ना-
पि परामर्शस्य मानं लिंगपरामर्शव्यापारकं। भूतभाविभ्यां लिंगाभ्यां अनुमित्यनुत्पत्तेः। अनन्यथासिद्धनि-
यतपूर्ववृत्तित्वं हि कारणं किं तु व्याप्तिज्ञानं साध्यज्ञानं लिंगज्ञानं वा जन्यज्ञानमात्रं वा परामर्शव्यापारकं न चा-
तिप्रसंगः। व्यापारेणातान्निरासात्॥ ज्ञानपदं च सविषयकमात्रपरं। नातः स्मरणात्मकपरामर्शस्थले व्यभि-
चारः॥ तत्र व्याप्तिविषयकसंस्कारस्य परामर्शव्यापारकस्य करणत्वात्॥ एवं चानुमानमेव वा तत्र करणमि-
ति संक्षेपः॥ तच्चानुमानं त्रिविधं॥ केवलान्वयि केवलव्यतिरेकि अन्वयव्यतिरेकि भेदात्॥ तत्र केवलान्व-
यिसाध्यकमनुमानं केवलान्वयि॥ तत्र यो धर्मः सर्वत्रैव वर्त्तते स केवलान्वयी। यथा ऽभिधेयत्वं ज्ञेयत्वं प्र-
मेयत्वादि॥ अभिधेयत्वं च भगवदिच्छारूपशक्तिविषयत्वं। तच्च सर्वत्रैव वर्त्तते। सर्वस्यैव भगवदिच्छा-
विषयत्वात्॥ एवं प्रमेयत्वं प्रमाविषयत्वं तच्च सर्वत्रैवाविद्यते॥ सर्वस्यैव भगवत्प्रमाविषयत्वात्॥ अत्र के-
चित्। यत्र साध्यनिश्चयोस्ति तत्रानुमितेरनुत्पत्तेः पक्षताऽनुमितेरंगं सा च साध्यत्वेन संदेहपक्षत्वं। न

च मेयत्वेन संशयो भवितुमर्हति। व्यतिरेककोटेरप्रसिद्धेः। अतः कथमिदमनुमानमिति। तन्न॥ सिसाधयिषावि-
रहविशिष्टसाध्यनिश्चयाभावो हि पक्षता। सा चेहाप्यस्ति। नतु संशयः॥ संशयं विनाप्यनुमितेरानुभाविकत्वा-
त्। साध्यनिश्चये सत्यपि अनुमित्सायां सत्यामनुमितेरुत्पत्तेः। तत्र पक्षताः संपन्नायां विशिष्टाभावात्। तत्र सिसाधयि-
षासहितसाध्यनिश्चयोस्ति। ननु तद्विरहविशिष्ट इति संक्षेपः॥ असत्प्रतिपक्षः केवलव्यतिरेकी॥ तल्लक्षणं च पक्षा-
तिरिक्तेऽनिश्चितसाध्यसाधनसहचारकत्वं। तथाहि॥ पृथिवी इतरेभ्यो भिद्यते पृथिवीत्वात्। यदितरभेदा-
भाववत् तन्न पृथिवी यथा जलं॥ न चैवं तथा पृथिवी तस्मादितरेभ्यो भिद्यत इति व्यतिरेकिण
उदाहरणं॥ न च पक्षातिरिक्ते जलादौ साध्यसाधनयोः साहचर्यमस्तीति निश्चीयते वा। न चानिश्चि-
तसाध्यकत्वमेव घटस्य कुतः॥ घटादौ साध्यस्येतरभेदस्य प्रत्यक्षत एव निश्चितत्वात्। अन्यथा साध्याप्रसि-
द्धौ तद्घटितव्याप्तिनिरूपणानापत्तेः॥ न च घटे साध्यनिश्चयस्तस्य पक्षत्वमिति वाच्यं॥ पृथिवीत्वा-
वच्छेदेन साध्यनिश्चयस्यैव तदवच्छेदेन पक्षताविरोधित्वात्॥ न चेहास्ति॥ सर्वत्र पृथिव्यां तन्नि-
श्चयाभावात्। अत्र व्यतिरेकसहचारादुक्ता व्याप्तिर्गृह्यत इति प्राञ्चः॥ साध्याभावसाधनाभावयोर्व्या-
प्तिग्रहादनुमितिः॥ न चान्यव्याप्तिग्रहात् कथमन्यानुमितिरिति प्रसंगादिति वाच्यं॥ साध्याभावव्या-
पकाभावप्रतियोगित्वेन पक्षधर्मतानिश्चयः साध्यानुमापक इत्यप्युपगमादिति। अन्ये तु भैया

समानाधिकरणत्व ४

कि॰ ॰अं॰ न्यान्वयव्यतिरेकी। यथा शब्दानुमानमितिसंक्षेपः॥ एवं हेत्वावनिरूप्य तदाभासान्निरूपयति॥ तत्रसव्य
भिचारविरुद्धासत्प्रतिपक्षासिद्धबाधिताः हेत्वाभासाः॥ सव्यभिचारस्त्रिविधः। साधारणोऽसाधार
णोऽनुपसंहारी च॥ तत्र साधारणत्वं साध्यवदन्यवृत्तित्वं। यथा धूमवान्वह्नेरित्यत्र धूमवदन्यस्मिंस्तप्तायः
पिंडे वह्निसद्भावात्। साध्यासमानाधिकरणत्वं वा। न वर्तते हि धूमासमानाधिकरणे धूमवदन्यत्वे तत्समाना
धिकरणो वह्निः। साध्यव्यापकीभूताभावप्रतियोगित्वं असाधारणत्वं। इदमेव सपक्षव्यावृत्तित्वमपं
ति। उदाहरणं तु शब्दो नित्यः शब्दत्वादिति। शब्दत्वं हि नित्यत्वव्यापको यः शब्दत्वाभावस्तत्प्रतियोगी न
चानित्यः शब्दः शब्दत्वादित्यत्राव्याप्तिः। तस्य सद्धेतुत्वात्। एतद्दोषज्ञानं चानुमितौ साक्षात्प्रतिबंधकं॥
व्यतिरेकिसत्प्रतिपक्षकल्पमौल्यात्। न चैवं सत्प्रतिपक्षमिति वाच्यं॥ हेतुभेदस्य एव तत्त्वांगीकारात्।
कथमस्य व्यतिरेकसत्प्रतिपक्षरूपतेति चेत्। कृतत्वात्। शब्दत्वे नान्वयी हेतुः॥ क्वचिदपि नित्ये श
ब्दत्वस्यादृष्टेः किंतु व्यतिरेकी॥ तथा च नित्यत्वाभावव्यापको यः शब्दत्वाभावः तत्प्रतियोगित्वाय
थासाध्ये साध्येत॥ तथा नित्यत्वे व्यापकीभूताभावप्रतियोगितया साध्याभावमपि साधय
त्॥ न च द्वयोर्विरुद्धयोरेकत्र निर्णयः॥ किंतु परस्परप्रतिबंधकत्वात् द्वयोरेवानिर्णय इति ध्येयं॥ अ
वृत्तिसाध्यहेतुत्वं न्यतरत्वं। अहेतिसाध्यकत्वं वा अनुपसंहारित्वं॥ यथाकाशवान्धूमादिशं इत्यादौ॥ १०॥

=स्मा१

साध्यासमानाधिकरणत्वं विरुद्धत्वं। यथा गौरश्वत्वादिति॥ यद्यपि अत्र असाधारणमेव व्याप्तिसाधारणत्वं च। तथापि उपाधिभेद
कृतः। पक्षे साध्याभावप्रतिबंधकः परामर्शः सत्प्रतिपक्षः॥ यथा जलं उष्णं स्पर्शवत्त्वादित्यादिनेदमनुष्णं तेजस्त्वादिति॥ असिद्ध
ता। व्यभिचाराद्यन्यपरामर्शप्रतिबंधकतावच्छेदकधर्मवत्त्वं॥ स च त्रिधा॥ स्वरूपासिद्धिराश्रयासिद्धिर्व्याप्यत्वासिद्धिश्च॥ यथा घटः
=स्वरूपासि-द्धिः ४ पृथिवीत्वोपरत्वात्॥ इत्यत्र घटरूपपक्षे हेत्वभावः। पक्षे पक्षतावच्छेदकासिद्धिराश्रयासिद्धिः॥ गगनकुसुमं सुरभि कमलत्वा
त् इत्यत्र पक्षे गगनीयत्वाभावः। एतदुन्नयत्रितयभिन्नं व्याप्यत्वासिद्धिः॥ यथा धूलीपटले धूमनिष्ठव्याप्यत्वाभावः। सा
ध्याप्रसिद्धिहेत्वप्रसिद्धिर्वा। पक्षे साध्यस्यान्यत्वं बाधः॥ यथा जलादिपक्षे वह्न्यभावः। न चात्र धूमस्य हेतोरसिद्धिरेवास्ति
=परामर्श १ सएवं दोषोऽस्तीति कृतं बाधेनेति वाच्यं॥ असिद्धिर्हि प्रतिबंधकतया दोषः॥ तथा च यत्र सामान्यकः परामर्शो ज्ञातः तत्र बा
धस्यैवानुमितेरनुत्पत्तेः॥ बाधस्यानुमितिप्रतिबंधकतया दोषत्वात्। आद्यक्षणावच्छिन्नो घटो रूपवान् पृथिवीत्वा
दित्यत्राद्यक्षणावच्छेदेन घटे रूपाभावः। रूपबाधस्थले दोषांतराभावाच्च॥ नहि पृथिवीत्वे रूपाव्याप्तिः यतो व्यभि
चारोन्नितिदिक्॥ ननूपाधिरपि हेत्वाभासांतरं भवतीति कथमेतत् एवेति चेत्॥ सव्यभिचाराद्यन्यतमत्वं हेत्वाभासत्वं
न चोपाधिस्तदन्यतमत्वं इति तस्य नैव कृतत्वात्॥ अतएव सिद्धसाधनमपि न हेत्वाभासांतरं॥ ननु कोऽयमुपाधिः
तत्राचार्याः॥ साध्यव्यापकत्वे सति साधनाव्यापक उपाधिः॥ तद्व्यापकत्वं तत्समानाधिकरणात्यंताभावाप्रतियो
गित्वं॥ समानाधिकरणस्त्वात्॥ यथा धूमवान्वह्नेरित्यत्रार्द्रेन्धनं भवति हि तत्साध्यव्यापकं॥ धूमसमानाधि

षि॰मं॰ करणस्य यावत्साध्यसमानाधिकरणत्वात्॥ न चैति च साधनाव्यापकः॥ वह्निमति अयःपिंडे तदसत्त्वात्॥ सद्धेतौ च नैवं॥ तत्र
हेतोः साध्यव्याप्यत्वात्॥ साध्यव्याप्यव्यापकस्य च साध्याव्यापकत्वात्॥ अत्र वदंति॥ इदं साधनावच्छिन्नसाध्यव्याप
कः व्याप्तं॥ यथा काकः श्यामः मित्रातनयत्वादिति॥ अत्र शाकपाकजत्वे न हि तत् श्यामत्वव्यापकं॥ श्यामत्वविरहे सत्त्वात्
किंतु मित्रातनयत्वावच्छिन्नश्यामत्वव्यापकं॥ मित्रातनयत्वावच्छिन्नश्यामत्वे तत्र तत्र शाकपाकजत्वस्य सत्त्वात्
त्वा॥ अथ साधनावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधित्वं विवक्षितमिति चेन्न॥ वायुः प्रत्यक्षः प्रमेय
त्वादित्यादौ पक्षधर्मावच्छिन्नसाध्यव्यापकरूपवत्त्वादावुपाधावव्याप्तेः॥ न हि प्रमेयत्वरूपसाधना
वच्छिन्नसाध्यव्यापकं तत्॥ आत्मादावसत्त्वात्॥ किंतु बहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वस्य व्यापकं॥ यावति तद्वति
र्द्रव्ये रूपस्य सत्त्वात्॥ अथ पक्षधर्मावच्छिन्नसाध्यव्यापकत्वे सति साधनाव्यापकत्वं विवक्षितमिति चेन्न॥
यथा काकः स्थले शाकपाकजत्वेऽव्याप्तेः॥ न हि तत्पक्षधर्मावच्छिन्नश्यामत्वव्यापकं॥ तथापि च श्यामत्ववति पक्षेऽस
त्त्वात्॥ अथ यत्किंचिद्धर्मावच्छिन्नसाध्यव्यापकत्वं विवक्षितं॥ स च धर्मः क्वचित्साधनं क्वचित्पक्षधर्मश्चेति चेन्न॥
पर्वतो वह्निमान् धूमादित्यत्र महानसत्वाभावस्योपाधितापत्तेः॥ भवति हि महानसान्यत्वरूपयत्किंचिद्धर्मावच्छिन्न
साध्यव्यापकत्वं उपाधित्वं॥ वह्निव्यापकत्वं महानसत्वाभावः। यावत्तादृशवह्निमति सत्त्वात्॥ न च धूमव्यापको धूम
वान् महानसेऽसत्त्वात्॥ अत्रोच्यते॥ साध्यानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकत्वमुपाधि ॥१२॥

त्वं यद्धर्मावच्छिन्नानधिकरणसाधनाधिकरणवृत्तिधर्मावच्छिन्नसाध्यव्यापकतावच्छेदकत्वं तत्॥ तद्वत्त्वावच्छि
न्नानधिकरणे तु सन्निविष्टं यत्किंचिद्धर्मावच्छिन्नसाध्याधिकरणनिष्ठाः यावंतो धर्माः तद्धर्मावच्छिन्नसमानाधि
करणत्वं तत्त्वं॥ भवति हि आर्द्रेंधनत्वावच्छिन्नानधिकरणे वह्निमन्निविष्टद्रव्यत्वावच्छिन्नधूमाधिकरणनिष्ठाः या
वंतो धर्माः आर्द्रेंधनत्वावच्छिन्नसमानाधिकरणाः अतस्तदार्द्रेंधनमुपाधिः॥ एवं रूपत्वावच्छिन्नानधिकरण
प्रत्यक्षस्पर्शाश्रयत्वव्याप्तिविशिष्टबहिर्द्रव्यत्वावच्छिन्नप्रत्यक्षत्वाधिकरणं यत्तन्निष्ठाः यावंतो धर्माः रूपत्वावच्छिन्नस
मानाधिकरणाः अतो रूपत्वमुपाधिः॥ एवं शाकपाकजत्वावच्छिन्नानधिकरणं मित्रातनयत्वावच्छिन्नमित्रा व१
तनयत्वावच्छिन्नश्यामत्वाधिकरणं यत्तन्निष्ठाः यावंतो धर्माः शाकपाकजत्वावच्छिन्नसमानाधिकरणाः अ
तः शाकपाकजत्वमुपाधिः॥ न चैवं सद्धेतोः संभवति॥ न हि महानसत्वाभावानधिकरणीयचत्वरधिकर
णं महानसं तन्निष्ठधर्मावच्छिन्नवह्न्यधिकरणं महानसादि तन्निष्ठाः यावंतो धर्माः महानसत्वाभावत्वा
वच्छिन्नसमानाधिकरणाः॥ अत एव सद्धेतौ पक्षेतरत्वं नोपाधिः। पक्षमात्रवृत्तिधर्मसमानाधिकरणत्वा
भावात्॥ इति दिक्॥ तच्चानुमानं परार्थं न्यायप्रयोगेण न्यायश्च प्रतिज्ञादिसमुदायः॥ यथा
पर्वतो वह्निमान् धूमात् यो यो धूमवान् सोऽग्निमान् यथा महानसः वह्निव्याप्यधूमवांश्चायं तस्माद्वह्निमानिति॥ पर्वतो वह्नि
मानिति प्रतिज्ञा हेतुत्वव्यवस्था वा भावः कोपाधिमत्त्वं प्रतिज्ञात्वं॥ एतद्धूमादिति शाब्दवृत्तितादृशोपाधिमत्त्वं हेतुत्वं॥

यथा महानसः॥१२

तच्चैतन्न्यायघटक

मि-मंहतनयोयो धूमवान् सोऽग्निमानिति शाब्दवृत्तिताहशोपाधिमत्त्वं उदाहरणत्वं । एतद्वह्निव्याप्यधूमवानयमिति श
ब्दवृत्तिताहशोपाधिमत्त्वं उपनयत्वं ॥ तस्माद्वह्निमानिति शाब्दवृत्तिताहशोपाधिमत्त्वं निगमनत्वं ॥ अवयव
त्वं च प्रतिज्ञाद्यन्यतमत्वं ॥ अत्र च अवयवाः पंच प्रतिज्ञादिभेदादिति संक्षेपः ॥ ॥ इति श्री महाचार्यचूडामणिवि
रचितायां सिद्धांतमंजर्यां अनुमानपरिच्छेदः ॥ ॥ अथोपमानं निरूप्यते ॥ ॥ तत्रोपमितिकरणं उपमानं ॥
उपमितित्वं चोपमिनोमीत्यनुभवसिद्धो जातिविशेषः ॥ शाब्दविषयकत्वव्यभिचारि जातिमत्परोक्षत्वं वा ॥
अनुमित्यादिवारणाय जातिमत्पदांतं ॥ अनुमितित्वादीनां वह्निमानित्यादिज्ञाने शाब्दविषयकत्वव्यभि
चारित्वात् ॥ श्रावणवारणाय परोक्षपदं प्रत्यक्षान्यपरं ॥ ननु उपमितित्वमेव कथं शाब्दविषयकत्वाव्य
भिचारीतिचेत् ॥ उपमितौ पदवाच्यत्वविषयकत्वा ॥ न च पदमविषयीकृत्य तद्वाच्यत्वं विषयीकर्तुमर्ह
ति ॥ पदं शाब्दात्मकमिति उपमितेः शाब्दविषयकत्वनियमः ॥ कुतः इयमुत्पद्यत इति चेत् ॥ सादृश्यज्ञाना
दिति गृहाण ॥ तथाहि ॥ सामान्यतो गवयपदवाच्यं किंचिदस्तीति ज्ञानं न विशिष्यापरिच्छिन्त्यातः कीदृशो
गवयपदवाच्य इति कंचित्पृच्छति तेन गोसदृशो गवयपदवाच्य इत्युक्ते ऽस्मिन्विपिने भ्रमता यदा गोस
दृशो पिंडोऽनुभवति तदा पूर्वानुभूततादृगतिदेशवाक्यार्थस्मरणपरिशिष्ट नत्वि अयं गवयपदवाच्य इति
मेयं उपमितिर्नाम ॥ नह्येतत्प्रत्यक्षं चक्षुरादिव्यापारापगमे जायमानत्वात् ॥ न च मानसं ततो विल १२५

क्षणतया ऽनुरूप्यमानत्वात् ॥ अन्यथा ऽनुमितेरपि मानसत्वापत्तेः ॥ नाप्यनुमितिः ॥ व्याप्तिज्ञानाद्यभावेऽप्युत्प
त्तेः ॥ नापि शाब्दी गवयत्वविशिष्टोपस्थापकपदाभावात् ॥ उपमितावयं गवयपदवाच्य इत्याकारिकायां
गवयत्वावच्छेदेन गवयपदवाच्यत्वावधारणात् ॥ न तु गोसादृश्यावच्छेदेन तस्य गौरवेणानवच्छेदकत्वात् ॥
अन्यथा अप्रतीतिमलव्यवहारप्रसंगः ॥ नवास्मृतिरियं पूर्वमननुभवात् ॥ अतो अतिरिक्तैवेयं ॥ तस्मा
त्करणी सादृश्यविशिष्टे तत्पदवाच्यत्वरूपवाक्यार्थानुभवः ॥ तत्स्मृतिर्द्वारं ॥ गवयत्वादिरूपावच्छेदकविशि
ष्टसादृश्यज्ञानं तत्सहकारीति संप्रदायविदः ॥ तच्चोपलक्षणं ॥ वैधर्म्यज्ञानादप्युपमित्युत्पत्तेः ॥ यथा की
दृशी पृथिवीति विशिष्यापृष्टे जलादिवैधर्म्यवती पृथिवीति गुरुणा चरितः सन्यदा जलादिविधर्मगुणवती
धर्मि अनुभवति तदा तद्वाक्यार्थस्मरणादुपमितिरुत्पद्यते इयं पृथिवीपदवाच्या ॥ एवं गंधवती पृथिवी सौ
ऽरपि तैयं ॥ तस्माद्यत्किंचिद्धर्मविशिष्टविशिष्याविदित संगतिकपदवाच्यतारूपवाक्यार्थानुभवः करणं ॥
यत्किंचिद्धर्मविशिष्टे तद्वाच्याधीस्तत्सहकारिणी [redacted] यदा च सत्यपि लघुधर्मे तदस्फुरणे गुरुधर्मवि
शिष्टत्वमादृश्यादिज्ञानं जायते तदा तदवच्छेदेनैव वाच्यताग्रहो जायते ॥ परं तु स च त्रपो गौरवेण बा
धादिति संक्षेपः ॥ इति श्री महाचार्यविरचितायां न्यायसिद्धांतमंजर्यां उपमानपरिच्छेदः ॥ ॥ अथ
शब्दो निरूप्यते ॥ ॥ तत्र शाब्दप्रमितिकरणं शब्दः ॥ शाब्दत्वं च शाब्दात्प्रत्येमीत्यनुभवसिद्धो जातिविशेषः ॥

शि० मं० जन्यपदज्ञानजन्यत्वव्यभिचारि अनुभवत्वाव्यापकजातिशून्यत्वे सति पदविषयकत्वाव्यभिचारिजातिशून्यधीत्वे
वा॥ प्रत्यक्षानुमितिस्मृतीनां वारणाय सत्यंतं॥ तत्र तादृशीनां प्रत्यक्षत्वादिजातीनां सत्वात्॥ जातिशून्यत्वमे
नुभवत्वाव्यापकजातिशून्यत्वं वा॥ सप्तम्यर्थः अनुभवत्वादीनां तदव्यापकशाब्दत्वस्य च सत्वात्॥ जन्यपदज्ञा
नजन्यत्वे व्यभिचारिजातिशून्यत्वमपि तथा। तादृगनुभवत्वादीनां सत्वात्॥ पदज्ञानजन्यत्वव्यभिचारि अनु
भवत्वापरजातिशून्यत्वं च अनुमितावतिव्यापकं॥ अनुमितित्वस्य जगवत्पदधीजन्यत्वाव्यभिचारित्वात्॥
अतः समुदितं उपात्तं॥ उपमितावतिव्याप्तिवारणाय शून्यांतं॥ ज्ञात्यादौ अतिव्याप्तिवारणाय धीपदं॥ सोयं
शाब्दः सकलजनानुभवसिद्धो दुरपह्नवः॥ तज्जनकत्वमपि तथा॥ आगोपालांगनमाबालपण्डितं च अत्र वाक्यादमु
मर्थं प्रत्येमीति प्रतीतेः॥ केवलमनुमानविधया वान्यथा वेति विप्रतिपद्यते॥ तत्र अनुमानविधयेति वैशेषिका
दयः॥ नैयायिकास्तु पृथगेव शाब्दो मानं न त्वनुमानं॥ शब्दस्यार्थाव्याप्यत्वात्॥ नहि यत्र शब्दस्तत्र घटानय
नाद्यर्थाः॥ शब्दस्याकाशैकवृत्तित्वात्॥ घटादेश्च तदवृत्तित्वात्॥ दृश्यते च व्याप्तिबुद्धिविधुराणामपि शाब्दोद
अन्यथानुभवः॥ नचायमनुमितिरूपः॥ तस्याः व्याप्तिधीजन्यत्वात्॥ प्रतियन्ति च लौकिकाः॥ अत
नुमितं प्रमाणाधीनकैतैश्चुतन्निदं नैयायिकैर्योऽस्य लं विस्तरेण॥ ननु यदि स्वातंत्र्येण शाब्दो मानं तदाप १३

रमानेयत्वतः पामराणामपि अर्थप्रत्ययः स्यादिति चेन्न॥ शक्तिग्रहस्यापि कारणत्वात्॥ पामराणां च घटादिशब्दे शक्तेर
ग्रहात्॥ अथ केयं शक्तिः॥ अभिधानामपदार्थांतरं संकेतग्राह्यमिति मीमांसकाः॥ नैयायिकास्तु॥ आवश्यके त्वास्म
त्कृत एव अभिधा न तु पदार्थांतरं मानाभावात्॥ स च संकेतो अस्मात् शब्दादयमर्थो बोद्धव्य इत्याकारिकेच्छा॥ हंतैवं पामरादि
संकेतितापभ्रंशशब्दे अभिधापि स्यादिति चेन्न॥ नहि संकेतमात्रमभिधा। किंत्वीश्वरसंकेतः॥ न चापभ्रंशेषु तत्र प्र
माणाभावात्॥ तर्हि कथं ततोऽन्वयबोध इति चेत्॥ शक्तिभ्रमादिति गृहाण॥ कथं तर्हि पामरादीनामीश्वरमविदु
षां मीमांसकानां चार्थप्रत्ययः शब्दादिति चेत्॥ उच्यते॥ न तावदीश्वरसंकेतज्ञानं तत्र कारणं किंतु संकेतत्वेनैव
स्मिंश्चेतवीतत्वेन ज्ञानं॥ आधुनिकसंकेतितानां चैत्रादिशब्दानां का गतिरिति चेत्॥ पित्रादेशेरुनिषितानामकु
र्यादिति सामान्यतस्तस्येश्वरसंकेतत्वादिति गृहाण॥ स्यादेतत्॥ सोयं संकेतः कथं ग्राह्यः॥ उपमानादिति चेन्न॥
तस्यैवोक्यार्थज्ञानमूलकत्वात्॥ तस्य शक्तिग्रहमूलकत्वात्॥ उच्यते॥ प्रथमतः शक्तिग्रहो व्यवहारात्॥ तथाहि
घटमानयेति केनचिदुक्ते कश्चन तदर्थं प्रतीत्य घटमानयति तच्चोपलभमानो बालस्तत्क्रियायास्तत्प्रयत्न
मनुमिनोति तेन च घटानयनगोचरप्रयत्नवता तस्य ज्ञानमनुमिनोति स्वप्रयत्ने तथा निश्चयात्॥ ततस्तद्धेतो
कोसार्थोपस्थितत्वात् तच्छब्दमेव कल्पयति। तदनंतरं घटादिपदानां प्रत्येकं आवापोद्वापाभ्यां घटादिपदश
इधीजनकमिति कल्पयति॥ किंचैतस्मिन्नतिप्रसंगभंगाय गृहीतानुकूलैर्भेदैतरूपैर्सी बोधं कल्पयति

स्प३

मि० मं०

किमनुपपन्नं वदन्तीतरी। क्वचिद्व्यवहारात् क्वचिदुपमानात् क्वचिद्वृद्धव्याकरणकोशादेरिति संक्षेपः॥ स्यादेतत्॥ द्वयो
र्व्यवहारं पश्यतामपि संकेतो ग्राह्यः तयोरेव कुत्र संकेतग्रहः अन्ययोर्व्यवहारादिति चेन्न अनवस्थापत्तेः अनादित्वा
दि[illegible]यमिष्टमेवमिति चेन्न॥ सर्गादौ तदभावात्॥ प्रलये मानाभावात्॥ सर्गादिरेवासिद्ध इति चेन्न। कार्यद्रव्याना
धिकरणकालाधिकरणकालस्य ध्वंसप्रलयतया प्रसिद्धस्यागमसिद्धत्वात्॥ द्यावापृथिवी जनयन्देव एकः इत्यु
क्तेः॥ सर्गादौ भगवानीश्वरः शरीरद्वयं परिगृह्य तथा व्यवहरतीति तस्माद्व्यवहाराद्बालः सर्वं संकेतं गृह्णा
तीति किमनुपपन्नम्। ईश्वर एव शक्तिमानिति चेत्॥ सर्गादौ व्यवहारान्यथानुपपत्तिरेवानुग्राहिका सर्गसिद्धौ स
र्वज्ञमन्यादृश्य एव प्रवृत्तिहेतवः संचितेति चेन्न॥ तेषामपि सर्वज्ञत्वे मानाभावात्॥ व्यवहारान्यथानुपपत्तिरेव मानमि
ति चेन्न॥ सर्वसर्गे व्यवहारस्यैवमप्यनुपपत्तिः॥ तत्राप्यन्य एवैकस्य तामिति चेन्न॥ प्रतिसर्गं स्वयमीश्वरस्य तथाकल्प
नायां गौरवात्॥ अस्तु कैमेव कल्पमिति॥ स एवास्माकमीश्वर इति दिक्॥ स्यादेतत्॥ यदि शक्तिग्रहः सहका
री तदा घटशब्दात् घटप्रत्ययः किं न स्यात्॥ अस्ति च स्वस्यैव शक्तिग्रहो घटे॥ अथ घटशब्दोऽयं घटलीतशक्तिकः स
तदर्थं प्रत्याययतीति चेन्न॥ नहि कार्यापीयः स्त्रीति वाक्यात् तदर्थान्तरीयप्रत्ययो न स्यात्॥ नहि तस्य ब
श्यास्ति तापांगवि शक्तिग्रहोऽस्ति तस्मात् एवाप्रतीतेः॥ अत्र मीमांसकाः॥ गवादिपदानां गोत्व एव शक्तिः
कथं तर्हि व्यक्तिलाभ इति चेत्॥ आक्षेपादित्याहुः॥ अनुक्तायमाक्षेपः तस्यार्थापत्तिरेवाक्षेपः॥ जातौ हि स्या १४

यं विनानुपपन्ना तया व्यक्तिः प्रतीयते इति भट्टाः॥ तन्न॥ अनुपपत्तिज्ञानमन्तरेणापि गौरस्तीति गोत्वविशिष्टव्यक्तिः प्रतीयते॥ तस्मा
त्समानवित्तिवेद्यत्वमाक्षेप इति गुरवः॥ यावती हि जातिधीः सर्वा व्यक्तिं विषयीकरोतीति कस्के लीनः॥ इदमेव कथमिति चे
त् जातिमानमात्रस्य एव तद्बोधकत्वमिति गृहाण॥ यद्वा जातिशक्तिरेव व्यक्तिं बोधयति॥ न चान्यशक्तस्यान्यबो
धनेऽतिप्रसंगः गोत्वशक्तपदं गोत्वविशिष्टं बोधयतीत्यनतिप्रसंगात्॥ अन्यथानुपपत्त्या तथैव कल्पनादिति
गृहाण तदपरे न सहन्ते॥ तथा सति गोत्वमस्तीत्यतो गोत्वविशिष्टप्रत्ययापत्तेः॥ तस्मात् गोत्वविशिष्ट एव शक्ति
र्न चोक्तदोषः॥ गोत्वसामान्यलक्षणाधामकलस्य गोरूपस्थितौ सर्वत्रैव गवि शक्तिग्रहसंभवात्॥ अस्तु वा एकत्रै
व गवि शक्तिग्रहः॥ न चान्यगवा बोधानापत्तिः॥ अन्यशक्तिग्रहादन्यबोधनेऽतिप्रसंग इति वाच्यम्। गोत्वविशि
ष्टशक्तिग्रहो गोत्वविशिष्टप्रत्यायक इत्येवमनतिप्रसंगादिति संप्रदायविदः॥ गव्येव शक्तिर्न तु गोत्वविशिष्टे गौ
रवात्॥ न चैवं गोत्वप्रत्ययानापत्तिः॥ गोत्वावच्छेदकशक्तिग्रहस्य गोत्वविशिष्टप्रत्यायकत्वादिति तत्त्वम्॥ स्यादे
तत्॥ यदि गोत्वविशिष्टे शक्तिः तदा गौः अश्व इत्यतो गोऽश्वयोरभेदप्रत्ययो न स्यात्॥ तस्यान्वयरूपत्व
अशक्यत्वात्॥ न च शब्दः शक्यमपि भासते इति प्रसंगात्॥ उच्यते॥ गोशक्तपदं गवान्वयं बोधयति॥ न च
शक्यबोधने घटमपि बोधयेदिति वाच्यम्॥ गोशक्तपदं गवान्वयबोधजनकम्॥ न च घटेन गवान्वयः येनाति
प्रसंगः स्यात्॥ महान्तः॥ अन्वयविशिष्टशक्तिग्रहादन्वये शक्तिरेवेत्याहुः॥ तन्न॥ अन्वयस्य मूलत्वात्॥

x न्यप १

=कार्यत्वान्वितेशद्दसावच्छेदेन कल्पयन्ति तदनुचावापोद्वापाभ्यां घटादिपदे शक्तिः॥

शि.मं. अनन्यलभ्यस्य च शब्दार्थत्वात्। अन्यथा लक्षणोच्छेदापत्तेः॥ प्राभाकरास्तु॥ कार्यान्विते शक्तिः पदानां॥ तथाहि॥ प्र
योजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धप्रवृत्तिमुपलभमानो बालस्तत्क्रियामेकतया कार्यताविशिष्टज्ञानमनुमि
नोति॥ स्वप्रवृत्तौ तेन कार्यत्वविशिष्टज्ञानस्य हेतुतावधारणात्॥ अतस्तद्बालकोऽनयोर्वाक्यं तस्योपस्थितत्वाच्छब्दमेव तथा
ऽवधारयति॥ ततस्तान्ति व्रीहिकां शक्तिग्रहः॥ प्रथमकल्पनानुरोधात् कार्यान्विते घटादौ शक्तिं कल्पयति॥ न
नु केवलघटादौ आद्य त्वापि विरोधात्॥ इत्थं च यत्र कार्यताया च कपदसमभिव्याहारो नास्ति तद्वाक्यमर्थ
वादरूपं सत्कमेव। व्यवहारस्य संसर्गाग्रहात्॥ ननु सर्वेषां पदानां कार्यान्वितवाचकत्वे तद्वाचकपदसमभि
व्याहारो नास्तीत्यसंगतं। असंगतौ चार्थवादस्याप्रामाण्यमिति चेत्। अत्रोच्यते॥ द्विविधा हि परशक्तिः॥
आनुभाविका स्मारिका च॥ तत्रानुभाविका कार्यान्विते। स्मारिका च ज्ञाते॥ तथा च घटादिपदं घटादिपदा
र्थस्यानुपस्थितौ कथं तदन्वयबोधं जनयेत्॥ कार्यान्वितबोधे तदुपस्थितेरपि हेतुत्वादिति नार्थवाद
स्याप्रामाण्यमिति केचित्॥ तन्न॥ आवापोद्वापाभ्यां लाघवाद्घटादिमात्र एव शक्तिग्रहः। ननु कार्यतान्वयेपि
अन्यलभ्यत्वात्॥ प्रथममनन्यलभ्यत्वे बालस्य नोपस्थितमिति चेत्॥ प्रथमं तर्हि कार्यान्विते शक्तिग्रहो
स्तु॥ यदा च तदुपस्थितं तदा घटमात्र एव शक्तिग्रहोस्तु मा बाधकत्वाभोरवात्॥ अथैवं चरमप्रवृत्तौ घटमात्र
१५ शक्तिकल्पना कथं बलवती प्रथमप्रवृत्तौ कार्यान्वितशक्तिकल्पनां बाधितुमिष्टेति चेन्न॥ प्रथमकल्प (शि) १५

वां१ नायलघुत्वासिद्धेः॥ नहि प्रथमप्रवृत्तिरेव बलवत्॥ चंद्रतारकादिस्वल्पतायाः शाब्द्या अन्यमहत्त्वप्रतीत्याबा
धानापत्तेः॥ चरमकल्पनायाएव लाघवसहायतया बलवत्त्वात्॥ किं च वक्ष्याद्यादिभ्योऽनुभवासिद्धेऽन्यथा
नुभवो न स्यात्॥ न चासंसर्गाग्रहमात्रं तत्र न तु संसर्गानुभव इति वाच्यं। घटमानयेत्यत्रापि तदापत्तेः॥ त
था च गतीशब्दप्रामाण्यप्रत्याशयापि॥ किं चैवमर्थवादरूपाणां श्रुतिस्मृतिइतिहासपुराणादीनामप्रामाण्यं
स्यात्॥ तथा च सुहृदुपहितेभिश्रे॥ प्रसिद्ध एव लोकेस्मिन्बुद्धबंधुप्रभाकर इति॥ तस्मादेवं वदन्प्राभाकरः कु
ध्रिष्टीव्यत्यासलिपिसादृश्याभ्यां प्रभाकर इति गृहीतो लोके रीतियुक्तमुत्प्रेक्षामः॥ ननु यदि शक्तिग्रहः
सहकारी तदा गंगापदस्तीरप्रत्ययो न स्यादिति चेन्न॥ शक्तिर्हि न तत्त्वेन प्रयोजिका किंतु संनिकर्षेण। अस्तिच
गंगापदस्यापि तीरे वृत्तिर्लक्षणा॥ अथ कः पुनर्लक्षणा नाम॥ शक्यादशक्योपस्थितिर्लक्षणेत्येके॥ तन्न॥ उप
स्थितेर्हि वृत्तिर्न तु सैव वा। अथ शक्यतात्पर्यं लक्षणत्वमपि॥ तन्न॥ अन्वयेपि तात्पर्यस्य लक्षणत्वापत्तेः॥ किं
च तात्पर्यनिर्वाहिका वृत्तिर्न तत्प्रामिकेय शक्तेरपि तत्त्वापत्तेः॥ उच्यते॥ स्वशक्यसंबन्धो हि लक्षणा॥ अस्ति
हि गंगापदशक्यः प्रवाहविशेषस्तत्संबन्धस्तीर इति॥ सा लक्षणा द्विविधा॥ गौणी शुद्धा च॥ तत्र सादृश्य
लक्षणः शक्यसंबन्धो गौणी॥ यथा गौर्वाहीक इति॥ तदन्या शुद्धा॥ यथा आयुर्घृतमिति॥ ननु यद्येवं तर्हि
चीः तर्हि राजपुरुषपदादौ कथं च प्रायोजनं नहि राजपदस्य संबन्धे शक्तिः॥ अथ संबंधोऽन्वयविधया

शि०१० भासेदेनीलोघटइत्यत्राभेदइवेतिचेत्॥राजपुरुषइत्यत्रापितदापत्तेः।अथनामार्थयोर्नैभेदेनान्वयः।न
त्वन्यथातथैवक्रमत्वेनराज्ञःपुरुषइत्यत्रननामार्थयोरन्वयः।किंतुविभक्त्यर्थनामार्थयोरितिचेत्षष्ठी
जपुरुषइत्यत्रकथंतयोस्तथान्वयइतिस्वयमेवविभावय॥अथसंबंधेलक्षणेतिचेन्न॥तथापिराज
संबंधःपुरुषइतिवदन्वयःस्यादितिदोषतादवस्थ्यात्॥अथराजपुरुषात्मकसमुदायएवराजसंबं से ४
धिपुरुषेलक्षणेतिचेन्न॥शक्तिविरहेलक्षणायाअयोगात्॥शक्यसंबंधोहिलक्षणेत्युच्यते॥रा
जपदंराजसंबंधिलक्षकंतदाचाभेदेनैवपदार्थद्वयान्वयः॥नचैवंकर्मधारयापत्तिः।समासस्त्वेदृशापी
पदयोःस्वस्वार्थत्वाभावात्॥अन्येतुलुप्तषष्ठीवान्वयंबोधयतीतिषष्ठीलोपमज्ञानतत्कृतत्रान्वयप्रत्य
यःशक्तिभ्रमाद्वाराजपदलक्षणयावेतिस्वीचक्रुः।वैयाकरणास्तुसमासस्यशक्यसमुदायविशिष्टार्थशक्ति
रेव।नचैवंराजपदशक्तिमविदुषोपिराजपुरुषादिपदादन्वयप्रत्ययःस्यादितिवाच्यम्॥समस्तशक्ति
ग्रहाभिनुष्ठामनोद्यौ॥नचायंपदद्वयशक्त्यग्रहेऽनुष्ठानमन्वयःसमवृतीतितच्छक्तिग्रहस्यसमुदायशक्ति
ग्रहहेतुत्वादितिवाच्यम्॥तन्न॥अवयवलक्षणयैवोपपत्तौसमुदायशक्तेर्मानाभावात्॥तदुक्तं।जहत्स्वा
र्थाकृतत्रैवयत्रकल्प्याहिविरोधिनीति।तस्मादन्यथोपपत्तौसमुदायशक्तिरयुक्तेतिसंक्षेपः॥स्यादेतत्॥मा
भूत्तत्पुरुषेशक्तिः॥बहुव्रीहौतुचित्रगुपदेचित्रगोस्वामिनिशक्तिरावश्यकी॥नहितत्रलक्षणयानिर्वा २१६

हः॥तथाहि॥चित्रंगोपदंगोस्वामिलक्षकंचित्रपदंवाचित्रस्वामिलक्षकं।नाद्यः।नहिचित्रस्यागवान्वयःसंभव
तितस्यपदार्थैकदेशत्वात्॥अंतिमएवनात्योपिगवानन्वयापत्तेः।अथगोपदंचित्रगोस्वामिलक्षकंचित्रपदंता
त्पर्यग्राहकमितिचेन्न॥चित्रपदंचित्रगोस्वामिलक्षकंगोपदंतात्पर्यग्राहकमितिविनिगंतुमशक्यत्वात्तस्मा
द्विनिगमकाभावात्समुदायशक्तिरेवेतिकेचित्॥अत्रोच्यते॥विनिगमकाभावादस्तुपदद्वयेलक्षणा॥नतुवि
शिष्टशक्तिरन्यलभ्यत्वात्।मीमांसकास्तुसमुदायएवलक्षणा।नचतच्छक्यतावाक्येलक्षणानुपपत्तिः॥स्वबोध्य
संबंधोहिलक्षणा॥अस्तिचवाक्यस्यापिविशिष्टंबोध्यं।अन्यथाकागतिर्गम्भीरायांनद्यांघोषइत्यादौ।नहि
नदीपदंतीरलक्षकं॥गम्भीरायामित्यनेनान्वयापत्तेः॥नहितीरंगम्भीरंनापिगम्भीरपदंतीरलक्षकंनद्यामित्यनेनान्व
यापत्तेः॥नहितीरंनदीतस्मादनन्यगतिकतयावाक्यमेवगम्भीरनदीतीरलक्षकमित्याहुः।अत्रोच्यते॥वा
क्यंनविशिष्टार्थबोधकंतद्बोधकतावच्छेदकस्याभावात्॥अतःस्वबोध्यसंबंधोलक्षणेतिनिरुक्तैवचः॥किं
चगम्भीरायांनद्यामितिविभक्त्यंतभागस्यनतीरलक्षणा।तदाधारतायाप्रत्ययानापत्तेः॥नापिगम्भीरायां
नदीतिभागस्यतस्याबोधकत्वात्॥बोधकत्वेवालक्ष्यैकदेशविभक्त्यर्थानन्वयापत्तेः।नहिसभागःप्रकृतिर्यन
तस्येविभक्त्यर्थान्वयःस्यात्।गम्भीरायामितिसप्तम्यनन्वयापत्तेश्च॥अथविभक्तिंत्यक्त्वैवगम्भीरनदीती
राधारकत्वंलक्षकमितिचेन्न॥अथऋतेव॥तस्मात्पदद्वयएवविनिगमकाभावाद्विशिष्टनदीतीरलक्षणा।

शि॰मं॰ न्वैकपदेवयर्थे।।परस्परतात्पर्यग्राहकत्वादितिसंप्रदायः।विस्तरस्त्वस्मिन्मालिमरीचिनिबंधतात्पर्यदीपि
कयोरनुसंधेयः।नपकुंजमर्द्दविख्यातोपादावप्युत्तरपदलक्षणैवेवोपपत्तौ नशक्तिरूपयेति।अन्यलक्ष
णात्।समाहारद्वंद्वे पाणिपादमित्यादौ पाणिपादं पाणौ प्रतियोगिकं पाद पदं तु पादप्रतियोगिकं समा
हारं लक्षयति।।नपाणि पादसमाहारे शक्तिः।समाहारश्च तुल्यवेदकक्रियान्वयित्वरूपं साहित्यं सेनावनादिवद्
द्वेसा बुद्धिविषयत्वं वा।।नन्वेवं पाणिपादं वादयेत्यत्रान्वयः समाहारे वादनकर्मत्वाभावादितिचेन्न।।
परंपरयातत्र तदन्वयादित्येके।।समाहारोत्तरविभक्त्यर्थकर्मत्वादिः समाहृयमाणएवान्वयः पदव्युत्पत्ति
वैचित्र्यादित्यन्ये।।पाणिपादं वादयेत्यत्र पाणिपादमात्रप्रतीतेर्नसमाहारलक्षणाशक्तिर्वा।।नचैवं द्विवे
चनापत्तिः असाधुकत्वात्।इतरेतरसमाहारसंज्ञाकुनदीवृध्यादि पारिभाषिकेवेतितत्त्वे।।इतरेतरद्वंद्वेके

शक्तिवा॰ ५ धवखदिरावितिस्वस्वप्रत्ययप्रतीतेर्नलक्षणौ मीमांसकास्त्वत्रापिधवखदिरसाहित्याश्रये लक्षणा
तदाहुः।।साहित्ये द्विवचनबहुवचने द्वंद्वसमासेविति।साहित्यं तुल्यवेदकक्रियान्वयित्वं।।अतएवव्य
क्तीत्वं तदनयासहेति नत्रपत्यासरूभावमात्रं नतु साहित्यं योगादोपपत्त्याः अनुमतिद्वारा अन्वये
नतुल्यवदनन्वयादित्याहुः।।नीलोत्पलमित्यादौ नीलाभेदस्यान्वयविधयेवभानेनापपत्तेः
कर्मधारयेनशक्तिर्नवालक्षणा।।अतएवतत्पुरुषकर्मधारयौ लधीयान्।तत्रहिपूर्वपदे संबंधि ।।१७।।

लक्षणैत्युक्तं।।ननुतत्पुरुषेघटःपटइत्यत्रघटपदेघटसंबंधिपरं।।ननुपदद्वयान्वयात्याभावश्चासमेव।संस
र्गाभावबोधकं नञ्पदं नान्योन्याभावबोधकमितिचेन्न।जोधवेनविनिगमनाविरहेणाभावमात्रएव
तत्रशक्त्यवधारणात्।।ननुनघटःपटइतिवदनोवघटयोरन्वयोपपत्तेर्नघटपदापिलक्षणायुक्तेतिचेन्न।।
नामार्थयोर्भेदेनान्वयस्यास्युत्पत्तेः।कथंतर्हिनघटःपटइत्यत्रान्वयइतिचेत्।घटपदस्य घटप्रतियोगि
केलक्षणयैविगृहात्।।प्रथमापावाषष्ठ्यर्थे लक्षणा।।ननुसुप्तिमंतरौ नलक्षणेतिचेत्तर्हि कथंषष्ठीतः
कर्मताप्रत्ययः।कथं वाएकस्यां दाराइतिबहुवचनं।आनुशासनिकीयं लक्षणेऽहैवेतिचेत्तुल्यं।।तदि
दमाहुः।।नियतप्रयोगाहिकेचिदप्ययाइति।।तथापिनयर्थ प्रत्ययः कथमाश्रयाश्रयिभावेनान्वयः ।।१७।।
ननुत्तरलुप्तषष्ठीस्मरणादितिचेन्न।।षष्ठीलोपमजाननोपितवाथेप्रत्ययात्।।ननुप्रथमा
वबलस्तकमितिचेन्न।।घटस्याऽभावेऽनन्वयापत्तेः तस्य कोऽप्रसाहा।।मैत्री।।समाबंधिकस्थले
एकदेशोप्यन्वयस्वीकारात्।।यथाचैत्रस्य गुरुकुलमित्यादौ चैत्रस्यजनकत्वेनान्वयः।अन्येतुसमुदा
यएवेतरपदार्थान्वयः परिपरासंबंधेनेत्याहुः।।युक्तंचाभाववबलस्तकत्वमेव।अन्यथाऽघटपटमि
त्यत्रसमानविभक्तिताऽनुपपत्तेः।।परेतनिपातस्थलेऽन्येवव्युत्पत्तिरितिघटपदभावयोः प्रति
योग्यनुयोगिभावेनान्वयापपत्तेर्नघटादिपदेलक्षणा।।अतएवचैऽड्डयमुरवमित्यादौ चैऽड्डवा

मि०भी० र्थयोर्भेदेनान्वयः॥ अत एव घटो नास्तीत्यत्रापि घटतदभावयोरन्वयो निःकलीकृत्याहुः॥ तन्न॥ भावाभा-
वात्॥ चैत्र इव मुखमित्यादौ तु चैत्रपदे तत्सदृशलक्षणेवपदे तात्पर्यग्राहकम्॥ अत एव चैत्र इव मुखे-
त्यत्र द्वितीया अन्यथा तदनुपपत्तेः॥ अस्तु वा षष्ठ्यर्थ एव विभक्तौ लक्षणा अनुशासनेना-
नुग्रहात्॥ घटो नास्तीत्यत्रापि तथात्वदोषः॥ अन्यत्तु घटो नास्तीत्यत्र घटस्याभावोऽस्तीति नार्थः॥ त-
था सति घटो नास्तीत्यस्याव्याप्तेः॥ अभावस्यैकत्वादिति॥ किं तु नञ्वलवत्त्वाभावप्रतियोगी
घटोऽस्तीति॥ तन्न॥ केवलाधिकरणाकांक्षापत्तेः॥ कथं घटो नास्तीत्यादीति चेत्॥ अभावप्रतियो-
॥ तादि९ गिनि सङ्ख्यान्वयात्॥ कथमिति चेत्तथैव प्रतीतिरिति गृहाण॥ परं तु इह तत्र नास्तीत्यभावाख्या-
तार्थनिबन्धन एव घटे प्रतीयते नयामिति चैत्र इत्यत्रेव नानो द्विवचनानुपपत्तिः॥ नन्वेवं ज्ञातोऽस-
त्त्वा नास्तीत्यत्र का गतिः॥ ज्ञातिवृत्तित्वाभावस्य सत्तायामसत्त्वात्॥ ज्ञातिमात्रमेव तत्तेषां चाप्र-
त्यानिषेद्धुमशक्यत्वादिति चेत्॥ यागातिशीति नसचावृत्तिरिति वा कात्स्न्य॥ अत्रोच्यते मतेदेवा-
कं॥ वृत्तिपदं बाधाद्यासंबंधावच्छिन्नवृत्तिपरमिति तु लक्षणं॥ तथापि तदयमर्थो निषेधो घटके-
थमन्वेतीति चेन्न॥ निपातातिरिक्तनामार्थस्य हि नामार्थेन भेदेनान्वयो न नामार्थमात्रस्ये- १८
ति प्रतीयेति॥ स्यादेतत्॥ घटो नास्तीत्यादौ भेद एव प्रतीयते तस्य तत्त्वेन घटत्वस्यत्वात्ता॥ ११८

वएवेत्यत्र किं नियामकं॥ अधिकरणवाचकपदसमभिव्याहारस्थल एवाभावबोधे तत्रप्रतियोगिपदयोः समानवि-
भक्तिकयोरन्योन्याभावबोधकत्वमिति चेन्न॥ न पचति चैत्रः चैत्रस्य न धनमित्यत्र सहस्थ्याभावात्॥ अन्ये तु पचतीति-
त्रसमानविभक्तिकत्वाबाह्य॥ अत्राहुः॥ नञ्विशिष्टं मीकं प्रतितियोग्यनुयोगिपदयोरभेदान्वयबोधे आकां-
क्षा तत्रान्योन्याभावबोधकत्वमन्यत्रान्यबोधकत्वमिति व्युत्पत्तिः॥ अस्ति च नघटः पट इत्यत्र नञ्समभि-
घटपदयोरभेदान्वयबोधे आकांक्षा॥ अतस्तत्रान्योन्याभावप्रत्ययः॥ एतेन घट इत्यत्र तु नञ्विभि-
न्नेकत्वाभेदान्वय आकांक्षेति तत्र संसर्गाभावप्रत्यय एवेति निरस्तं॥ अज्ञानाचनत्रस्यतरं लक्षणयेव-
तदर्थसिद्धेः॥ नन्विदमयुक्तं॥ तथाहि॥ लक्षणायां मुख्यार्थेतरान्वयानुपपत्तिबीजं॥ न च वीजेनायो-
ग्यमस्ति चेत्तत्कि॥ गंगागं गीत्यादौ तदभावात्॥ अतो हेतौ तस्मात् स्वमितिश्चेत्॥ किमिदं लक्षणाबी-
जत्वं॥ न तावज्जनकत्वं॥ गंगातीरयोः संबंधस्यानुपपत्तिज्ञानाजन्यत्वात्॥ नापि तत्तज्ज्ञापकत्वं॥
अनुपपत्तिज्ञानमंतरेण गंगातीरयोः संबंधस्य चक्षुरादिना ग्रहात्॥ नापि तात्पर्यग्राहकत्वं तात्पर्यव्या-
प्यांतरत्वेपि तत्करणत्वात्॥ अथ लक्षणा प्रसक्तबाधकस्य गतिरिति तदिति चेत्॥ षष्ठी प्रवेशाय इत्यत्रव्य-
भिचारात्॥ तात्पर्यविषयानुपपत्तिरस्त्वास्तीति चेत्तर्हि तात्पर्यानुपपत्तिरेव लक्षणाबीजमस्तु॥ सा च

ग्रं॰ सि॰ हाप्यस्ति ॥ स्यादेतत् ॥ गंगायां घोष इत्यादौ लक्षणाप्रयोजनं शैत्यपावनत्वादिप्रतीतिः ॥ न च तत्प्रतीतिर्लक्षणासाध्या
प्रयोजनाभावात् ॥ लक्षणायाश्च प्रयोजनवत्त्वनियमादिति चेन्न ॥ लक्ष्यप्रतीतेरेव प्रयोजनत्वात् ॥ तथापि प्रयोजनान्त
रं तत्र नास्तीति चेत्तत्किं ॥ लक्षणाया हि प्रयोजनवत्त्वनियमो ननु लक्ष्यप्रतीत्यतिरिक्तप्रयोजनवत्त्वे न गौरवादप्र
योजकत्वाच्च ॥ स्यादेतत् ॥ नानार्थस्थले तात्पर्यविशेषप्रत्ययप्रकरणादिकं निर्णायकं तथा च यत्र प्रकरणा
दिकं न्यार्थं तत्र प्रतीयते तत्र नानाभिधानमूलं सहकार्यभावात् ॥ नापि लक्षणायां गादि निचेन्न ॥ प्रकरणा
दीनामननुगततया सहकारित्वानुपपत्तेः ॥ तात्पर्यग्राहकं चैनेषामनुगममिति चेत्तर्हि लाघवात्तात्पर्य
ग्राहकमेव सहकार्यमस्तु ॥ सैव च व्याप्तिरस्ति ॥ स्यादेतत् ॥ लक्षणा हि पदप्रवृत्तिरूपं तु पदतदेकदेशा वाक्यरचना
र्थं ग्याधाकारास्त्रितत्वाश्रयभेदाद्भेद इति चेन्न ॥ असिद्धेः ॥ वेदकृदेशादयो ह्यर्थविशेषतात्पर्यग्राह
काः न तु तत्प्रतिपादका इति ॥ स्यादेतत् ॥ लक्ष्ये तात्पर्यज्ञानं लक्षणासहकारि ॥ ननु वक्तृस्वार्थे तात्प
र्यग्रहो नियतः ॥ स्वार्थे रचितकाव्यादौ तात्पर्यविषयस्याप्रसिद्धस्य च न लक्षणादिति चेन्न ॥ व्यंज
तात्पर्यग्रहस्यानपेक्षायां गंगायां घोष इत्यादौ शैत्यादिकमेव प्रतीयते न कुकेशवालुकादि मत्यादि
ति नियमो न स्यात् ॥ वासनाविशेषपरिपाकान्नियम इति चेत्तर्हि लक्षणास्थलेऽपि वासनयैव मका
स्तु कृतं तात्पर्यग्रहेणेति ॥ वस्तुतो व्युत्पन्नायां गच्छ गच्छसीत्यत्रैव इत्यत्रास्या व्याख्यातात्पर्यमनुमीयते संभा १९

= मा गा १

वक्तव्य ॥ न तु मा गा इति निर्णयतत्कृतिकर्तृत्वं तेरणात् ॥ स्यादेतत् ॥ यदि एतदेव हेत्वर्थं तर्हि अजयतीत्यादौ प्र
कर्षबोधः ॥ न हि प्रादेः प्रकर्षादौ शक्तिः द्योतकत्वात् ॥ न च लक्षणा शक्यता केवलानुच्यते ॥ जयतिरत्र प्रक
र्षजयलक्षकः प्रत्ययादिस्तु तात्पर्यग्राहकः ॥ तत्त्वमेव च द्योतकत्वं ॥ न च जयपदसामर्थ्यमेव प्रकर्षो लक्ष्य इति वा
च्यं जयमात्रे हि शक्यं न तु विशिष्टजये ॥ तदाह ॥ शक्यादन्येन रूपेण भवति ज्ञानं लक्षणेति ॥ ननु प्रादेर
प्रकर्षादौ कुतो न शक्तिः कल्प्यत इति चेन्न ॥ अन्यलभ्यत्वादिति गृहाण ॥ अतिमो इत्यत्र तु शेधातोरेवा
र्थं प्रत्याययति ॥ धातुलोपमज्ञानतस्तत्रार्थप्रत्ययाभावादिति संक्षेपः ॥ स्यादेतत् ॥ आख्यातस्य तावत्
घ्नतएव शक्यमुपचतीत्यस्य पाकं करोतीति विवरणात् ॥ व्यवहारादिवत् विवरणादपि शक्तिनिर्णयात् ॥
तथा च रथो गच्छतीत्यत्र न मुख्यः प्रयोगः ॥ रथादौ नामचेतनतया गमनानुकूलयत्नाभावात् ॥ नापि ल
क्षणा चिमेचको लक्षणानङ्गीकारात् ॥ अन्यथा व्युत्पत्त्यनुशासनवैयर्थ्यात् ॥ अतः सिद्धं यत्नेनेरणेति चे
न्न ॥ व्युत्पत्त्यनुशासनबलादिहाचेतनार्थेऽप्यसिद्धत्वाल्लक्षणा ॥ न लक्ष्य एव ॥ इह च न विरुद्धोऽर्थः
लक्षणा ॥ किन्तु व्यापारत्वरूपेण वि त्यर्थेऽप्यनुशासनकीलक्षणा ॥ यथा रथो गच्छतीत्याः कर्मत्वे न च कर्म
त्वम विसंबंधः ॥ स च शक्य एवेति न लक्षणा ॥ कर्मत्वं च प्रकारकबोधस्य तथा विनासंभवात् ॥ तत्प्रका
रकबोधो न भवत्येव ॥ किन्तु धर्मी बोधत्वप्रकार इति चेन्न ॥ अनुशासनवैयर्थ्यात् ॥ क्षितौ पायाः असाधुत्वाप

ल०म० कर्मानुशासनमिति चेन्न ॥ निष्ठादिवर्जं नैव कृत्यात् ॥ तत्र द्वितीयायाः साधुत्वज्ञापकं तदिति चेन्न ॥ कृत्ययोग
विकल्पविधानवैयर्थ्यात् ॥ अनिषेधे नैव तृतीयोपपत्तेः ॥ पाक्षिकषष्ठ्यर्थं तदिति चेन्न ॥ संबंधत्वप्रकारक
बोधजनिकायाः शेषवचनादेव सिद्धेः ॥ निष्ठादियोगे शेषषष्ठ्या असाधुत्वज्ञापकं तदिति चेन्न ॥ तद्योगेपि
तादृश्या बहुषु दर्शनात् ॥ किं विभक्त्येन लक्षण ॥ कथं तर्हि ओदनं पचं जानातीति विषयतायाः कर्मत्वशक्ति
तायाः विषयत्वे द्वितीयार्थः ॥ क्रियाजन्यफलशालित्वाभावादेव चेत्रां गच्छतीत्यत्र कुतः कर्मत्वप्रतीति
र्लक्षणयैवेति विभावनीयमायुष्मता ॥ आस्तां तावदित्यतरमिति चेन्न ॥ कुदृष्टेरनुपपत्तेः ॥ मीमांस
कास्तु ॥ अनुकूलव्यापारमात्रमाख्यातार्थः ॥ रथो गच्छतीत्यादौ मुख्यः प्रयोग इति ऊचुः इत्याहुः ॥ तन्न ॥ यत्न
त्वस्य जातित्वेन तस्यैव शक्यतावच्छेदकत्वान्नत्वनुकूलव्यापारत्वस्य गुरुत्वात् ॥ कथं तर्हि पाकानुकूलयत्न
त्वस्य प्रतीयत इति चेत् ॥ संसर्गविधयैवेति ॥ कथं तर्हि जानातीच्छतीति यतते करोतीत्यादिषु प्रयोगः ॥
नहि ज्ञानाद्यनुकूलयत्नोस्ति प्रतीयते वेति चेत् ॥ आश्रयत्वे लक्षणयेति गदाधराः ॥ मतिकृतस्तु जाना
तीत्यादौ धात्वर्थ एव चैत्रादेः साक्षादन्वयिति ॥ आख्यातप्रतिपाद्यश्च कालः संख्या चानन्वयलोपाय प्रत्यय इति
त्याहुः ॥ तच्चिंत्यं ॥ नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयबोधस्याव्युत्पत्तेः ॥ अन्यथा ओदनः पचतीत्यत्र ओ
दनपाकयोः कर्मतासंसर्गेणान्वयः स्यात् ॥ वस्तुतो जानातीत्यादौ आख्यातार्थानवगमे आख्यातार्थे प्र
त्यान्वयो न स्यात् ॥ तस्याः आख्यातार्थविशेष्यगामित्वात् ॥ विभक्त्यर्थविशेष्यत्वे नामार्थः आख्याता ॥२०॥

र्थविशेष्यः ॥ तेन चैत्र ओदनं पचतीत्यत्र तथाविधचैत्र आख्यातार्थविशेष्यः न त्वोदनो द्वितीयार्थविशेषणं ॥ तद्व्याप
च्यत इत्यत्र कर्मणः कृतितावर्थीवरूद्ध्या तस्त्रीयत इत्यत्र स्थित्यनुकूलाकृतिरिति आख्यातार्थकस्यापि नवि
शेष्यत्वमिति संख्यान्वयनिर्वाह ॥ अत एव ओदनं भुंक्ते कर्मैकवचनमेवत्वं चु ॥ धात्वर्थविशेष्यको आन्वयबोधगान
चेवं धात्वर्थस्य द्वित्वादिविवक्षायां द्विवचनाद्यापत्तिः ॥ असाधुत्वादित्यपि चेच्चिंत्यं ॥ स्यादेतत् ॥ आख्याता
र्थकालः कुत्रार्थेन्वेतीति चेत् ॥ एकपदोपात्तत्वप्रत्यासत्त्याकृतावित्येवेति ॥ धात्वर्थ इत्यपरे ॥ कथं तर्हि तथा
जानातीत्यादौ ज्ञानेवर्त्तमानत्वादि प्रतीयत इति ॥ स्यादेतत् ॥ भविष्यत्वातीतत्वे आख्यातविशेषवाच्ये भवि
ष्यत्वं च विद्यमानप्रागभावप्रतियोगित्वं ॥ विद्यमानध्वंसप्रतियोगित्वं अतीतत्वमिति पचति चैत्रे भावि
कृतिप्रागभावमादाय पक्ष्यतीति ॥ आद्यकृतिध्वंसमादाय अपाक्षीदिति स्यात् ॥ न स्यात् ॥ आद्यकृति
प्रागभावस्यैव भविष्यत्वे नचरमकृतिध्वंसस्यैवातीतत्वे अभिधानात् ॥ अथौदनं पचतीत्य
ओदननिष्ठविक्लित्तिजनकव्यापारविशेषकर्तृत्वं प्रतीयते तत्र विक्लित्तिरूपस्यानुकूलव्यापारस्य कस्या
र्थः ॥ उच्यते ॥ विक्लित्तिः फलं द्वितीयार्थः तदनुकूलो विलक्षणव्यापारो धात्वर्थः ॥ अनुकूलता च संसर्गः ॥ न
नु कर्मत्वं द्वितीयायां वाच्यं ॥ तच्च क्रियाजन्यफलशालित्वं न तु फलमात्रमिति चेन्न ॥ क्रियायाः धातुवाच्य
त्वात् ॥ जन्यत्वाश्रयतयोश्च संसर्गतयोपपादयितुं लाभात् ॥ फलमात्रएव शक्तेः कल्पनात् ॥ अनन्यलभ्यो हि श

सि॰मं॰ द्वार्थः॥ ननु फलमपि धातुजन्यमेव फलानुकूलो हि व्यापारो धात्वर्थ इति चेन्न॥ फलानुकूलत्वोपलक्षितो
विलक्षणव्यापारो हि धात्वर्थः न तु फलानुकूलत्वमपि गौरवात्॥ नन्वेवं त्यजिगम्योः पर्यायतापत्तिः। तथाहि॥
संयोगानुकूलं कर्म गमेरर्थः॥ विभागानुकूलं कर्म त्यजेरर्थः॥ तत्र यदि फलानुकूलत्वमुपलक्षणं तदा कर्ममा
त्रं शक्यं॥ तथा च कुतो न पर्यायता॥ आस्तां पर्यायता को दोष इति चेन्न॥ ग्रामं गच्छतीतिवत् कृते ग्रामं त्य
जतीत्यापत्तेः॥ मैवं॥ गच्छतीत्यादिसमभिव्याहृतद्वितीयायाः संयोगरूपफलबोधकत्वं व्युत्पत्तेः॥ त्यज
तीत्यादिसमभिव्याहृतायाश्च विभागबोधकत्वव्युत्पत्तेरेव यथोक्तातिप्रसंगनिरासात्॥ न्यायमास्थरत्य
न्नस्तु॥ फलमवच्छेदकमेव द्वितीयाया आश्रयता॥ न चैवं कर्मणो पर्णं पततीत्यत्र कर्मपदात् द्वितीयापत्तिः॥
समभिव्याहृतधात्वर्थावच्छेदकफलाश्रयताबोधकत्वव्युत्पत्तेः॥ अत एव धात्वर्थावच्छेदकफलशालि
त्वं लक्षणीयं वै॥ नहि क्रियाजन्यफलशालित्वं तत्र॥ वृक्षात्पर्णं पततीत्यत्र वृक्षस्याः कर्मत्वं भूमि
ज्ञसंयोगाश्रयतया कर्मत्वापत्तेः॥ नन्वेवं संयोगानुकूलव्यापारस्य पतत्यर्थतया त्वयापि कर्मत्वं व
मर्दुस्यन्नमिति चेन्न॥ पतत्यर्थफलस्यावच्छेदकत्वानंगीकारात्॥ तद्धात्वर्थानधिकरणत्वस्य वातिवि
वक्षणात्॥ न चैत्रस्य धात्वर्थावच्छेदकफलग्रामसंयोगाश्रयत्वेपि कर्मत्वमिति स्वीकुर्वतां निस्संक्षेप॥
तस्य पूर्वस्य निराकांक्षादावन्वयबाधकतया आकांक्षादिकं सहकारि॥ तत्र यत्पदस्य यत्पदेन र१॥

नसहयादृशान्वयानुभवेन कृतत्पदस्य तत्पदसमभिव्याहारस्तादृशान्वयबोधे आकांक्षा॥ भवति हि नाम
पदोत्तरवर्तिविभक्तिपदेनैव सहान्वयबोधकं॥ अस्ति तेन समभिव्याहारस्तादृगन्वय आकांक्षा॥ अत एव
घटः कर्मत्वमित्यतो न घटमितिवदन्वयबोधः आकांक्षाविरहात्॥ धातुपदं आख्यातपदेनैव सहान्व
यविशेषबोधकमिति भवति॥ तत्राख्यातपदसमभिव्याहार आकांक्षा॥ अत एव आनयने कृतिरित्या
दावानयतीतिवन्नान्वयबोधः॥ कृतिवाचकाख्यातसमभिव्याहाराभावेनाकांक्षाविरहात्॥ ननु
नामपदं द्वितीयादिविभक्तिसमभिव्याहृतमेव कर्मत्वादौ नामाश्रयाश्रयीभावेनान्वयबोधकमित्य
त्र किं नियामकमिति चेन्न॥ नाम्नः स्वार्थनिष्ठकर्मत्वाद्यनुभवजनने तदुपस्थापकविभक्तिसहकारि
त्वमिति गृहाण॥ हेतौ वा॥ यस्य पुरुषस्य घटः कर्मत्वमित्यादितो वाक्याद् व्युत्पत्तिरभूत् कुतस्तो
न्वयबोध इति चेन्न॥ तत्पुरुषं प्रत्यमाने नास्ति का कथा तदन्वयबोधे॥ तथापि यदि कश्चित्तादृशः स्या
त्तस्य किं न भवतीति चेच्छाश्रुतानुभवे ध्रुवमेव॥ अन्वयव्यतिरेकसिद्धकारणविरहादिति॥ एतस्या
श्चाकांक्षायाश्चानेहेतुः॥ तद्भ्रमेणान्वयबोधात्॥ अपरा च प्रकृतान्वयबोधसमानाकारस्वज्ञान्या
न्वयबोधविरहः प्रकृतान्वयबोधस्वरूपसती हेतुराकांक्षा॥ अतो घटमानयतीतिपदसमूहेऽन्वय
बोधे जनिते नान्वयबोधान्तरजनकं॥ स्वज्ञान्यान्वयबोधध्रुव्यविरहात्॥ एवं गामानयत्वतोन्य

सि॰मं॰ द्बोधे ज्ञाते दंडेनेत्यन्वयबोधे निराकांक्षतापत्तेः॥ अतन्त्रस्थप्रकृतान्वयबोधसमानाकार इति। न च
गामानयेत्यन्वयबोधः प्रकृतो येन दंडेन [illegible]मानयेत्यन्वयबोधस्तेन समानाकार इति दिक्॥ योग्य
ता च एकपदार्थे परपदार्थस्य प्रकृतसंसर्गवत्त्वे न पयसा सिंचतीति योग्यं पयसि सेककरण
त्वसंसर्गस्य सत्त्वात्॥ अग्निना पयसि सेककरणत्वसंसर्गो नास्तीति तस्मिंश्चायोग्यत्वं॥ आकांक्षा इत्य
त्र समाप्तावायरूपसंसर्गवत्त्वमादायापि दान्वयबोधेपि योग्यता स्यादत आह प्रकृतेति॥ अस्याश्च
अभ्रमत्वपन्नयबोधावज्ञाने कारणं॥ ननु संसर्गस्याहृवेत्वात्कथं प्रमाज्ञानं संभवतीति चेत् न तस्य
ते॥ योग्यतायाज्ञानमात्रं हेतुः॥ आसत्तिश्चात्र पयःसेककरणतावन्न वेति संशयरूपं ज्ञानं क्वचि
त्तन्निश्चयोपि॥ यथा प्रत्यक्षेण दृष्टे घटोस्तीति। परे च संसर्गग्रहः प्रतिबंधकः तद्दशायां योग्य
तास्वरूपसत्ती हेतुः॥ नन्वेवं शैलस्तदा वह्निमानित्यत्र संसर्गाग्रहदशायां योग्यं स्यात्॥ इष्टत्वात्॥ न
च बाधबीजसंसर्गज्ञाने कारणेन तत्संसर्गाग्रह इति वाच्यं॥ अस्य संसर्गाग्रहस्य लौकिकसाक्षात्कारा
तिरिक्तपित्तादिदोषाजन्यविशिष्टज्ञानमात्रं [illegible]हेतुत्वावधारणात्॥ कथमन्यथा चंदनेन
सुरभीति निश्चये सुरभि चंदनमिति ज्ञानेन स्यात्॥ तद्दशायामनुमितावपि च दूषणी घटस्य लौकि
कः साक्षात्कार इति तत्र पीतत्वेन स्यैवदोष तदित्यज्ञत्वात्॥ न च घटोऽस्ति घट इत्यत्र प्रतिबंधकत्वा ॥२२॥

संसर्गाग्रहविरोधितेत्याप्रत्यक्षतार्किः॥ अभिधेयत्वप्रतियोगित्वेनाऽभावभ्रमः तदभावस्य प्रसिद्धिः॥ यदि च सोपि न प्रसिद्धः
तदा स्तां तत्र योग्यताऽहेतुरेव॥ न चैवं व्यभिचाराच्छाब्दबोधं प्रति योग्यतायाः कथं कारणत्वमिति वाच्यं॥ नहि शा
ब्दबोधत्वावच्छिन्नं प्रति योग्यतायाः कारणत्वं॥ किंतु तदीयतादृशान्वयबोधे तदीयतादृशान्वयविरहनि
श्चयाभाववत्त्वेन विशिष्यैवेति न व्यभिचार इत्याहुः॥ आसत्तिः पदाव्यवधानेन अतएव गिरिरग्निमानित्यासन्नं।
अनासन्नं च गिरिर्भुक्तमग्निमान्देवदत्तेनेति॥ न चैवं स्थाल्यामोदनं पचतीति स्थाल्यामित्यस्य पाकेन नास
न्नतापत्तिः ओदनमित्यनेनाव्यवधानादिति वाच्यं॥ प्रकृतान्वयबोधानुकूलाव्यवधानोपस्थितेर्विव
क्षितत्वात्॥ ओदनपदं च स्थाल्यधिकरणकौदनकर्मकपाककर्तेत्यन्वयबोधानुकूलमेव। स्थाल्यां पचती
त्यन्वयबोधे त्वनासन्नमेवेति बोध्यं॥ न चैवं श्लोकादियोजनया अन्वयबोधः कथं व्यवहितेन प्रत्यय
सिद्ध इत्यव्यवहितत्वमात्रमेवेति वाच्यं। श्लोकेपदान्तान्वयबोधः किंतु यो जनानां स्यादित्याहुः॥ वस्तुत
स्तादृशौ योग्यतात्वेक्षपतितात्पर्यज्ञाने व्यवहितानां यथान्वयबोधात् तद्धितलेनाविलंबाच्च नेतहेतो
र्हेतुः किंतु व्यवहितपदतात्पर्यज्ञानेनैव तत्पदत्वदापव्यवहितोच्चारणाभिसंधानेवाहेतुत्वाभिसंधायेव
रिछा। अतएव सा निराकांक्षा प्राप्तिः व्यवहृतेनान्वयबोधानुसंधानात्॥ आकांक्षा च भगवांतात्पर्यमादाय
वगतिरिति नव्याः॥ तदपि न॥ सत्पर्यंततात्पर्यज्ञानाभावे तद्विलंबेन शाब्दबोधविलंबात्॥ तस्माद्व्युत्पादज

॰मं॰ न्यपदार्थोपस्थितिरासत्तिः। सा च स्वरूपसती हेतुः। नहि पदार्थानुपस्थितावन्वयबोधः। न च एकपदजन्यत्वं निर्व्यर्थं।
घटपदात्समवायेनाकाशस्मरणे घटोऽस्तीति वाक्यादाकाशान्वयबोधापत्तिः। ननु घटमानयेत्यत्र घटकर्मकत्वान
यनरूपपदस्थितौ नानायुगपदग्रे भवेत्। अत्र तत्तरविनाशिनां क्रमिकाणां मेलकाभावादिति चेन्न। क्रमिकपदानु
भवजन्यानेकसंस्कारैर्युगपदेव तत्पदस्मरणाद्युपपत्तेः। तत्पदार्थस्मरणेनान्वयबोधः संभवतीति संक्षेपः॥
अतएवाव्यवधानेन पदजन्यपदार्थोपस्थितिरासत्तिरित्यपास्तं॥ तयोरपि तैव्यर्थात् व्यवहितोपस्थितावेकस्या
उपस्थितेर्नाशात्॥ तात्पर्यं चेदमेतत्॥ अर्थस्यान्वयबोधं जनयत्विति प्रयोक्तुरिच्छा॥ आद्यो वक्ता चार्थसंधानवित्
तमात्रेण न तु वक्तेवामो निश्चितो ह्यत्यादिः। शुकवाक्ये च भगवदिच्छैव गतिः॥ तस्य च निश्चयो हेतुः। तत्संशयव्यतिरे
कनिश्चययोरन्वयबोधात्। तत्कृते चान्वयबोधोऽद्येति संक्षेपः॥ सोयं शब्दो द्विविधः॥ विधिरर्थवादश्च॥ तत्र विधि
प्र॰ निधायकः। तद्घटितं वाक्यं वा विधिः॥ अभिधेयं विधिस्थकार्यत्वं॥ तच्च कृतिसाध्यत्वमिति। किमत्र मानमिति चे
त्। विधिस्तावत्प्रवर्तकः। न तावत् प्रवृत्तिजननीमिच्छामजनयित्वा न प्रवृत्तिजननायालं॥ अतो यस्य बुद्धिः
प्रवृत्तिजननीमिच्छां सूते स विधिरभिधेयः। प्रवृत्तिजननी च कृतिसाध्यत्वप्रकारिकेच्छा। तज्जननी च कृति
साध्यत्वप्रकारिका बुद्धिः॥ कृतसाध्यत्वज्ञाने तदनुपपत्तेः। ननु कृत्यसाध्यत्वप्रकारकज्ञानाभावो गौरवात्
वेदाचिकीर्षात्यत्यापत्तेश्च। अतः कृतिसाध्यत्वमेव विध्यर्थ इति॥ ननु एवं मण्डलीं कुर्यादिति वाक्यादुत्पन्नकृति भरद्र॥
साध्यताज्ञानवतो बलवदनिष्टजनकमेव मण्डलीकरणं ज्ञानेनामण्डलीकरेत्

=म५

कृतिसाध्यत्वबुद्धिः ८

प्रवृत्तिः स्यात्॥ अथ बलवदनिष्टाननुबन्धिकृतिसाध्यताज्ञानं प्रवर्तकमिति चेन्न। इष्टमपि इष्टाजनकत्वेन बल
वदनिष्टाननुबन्धिकृतिसाध्यत्वेन च मण्डलीकरणं ज्ञानतस्तत्र प्रवृत्तिः स्यात्॥ प्रवृत्तिजनकत्वे स्यात् नस्य सत्त्वात्॥
अत्र प्राभाकरानुवर्तिनः। नित्यश्रौतादिमत्प्रतिसंधानजन्यं कार्यताज्ञानं प्रवर्तकं॥ अन्यत्र चेष्टसाधनता
ज्ञानजन्यमिष्टसाधनताज्ञानकालीनं वा कार्यताज्ञानं प्रवर्तकं। प्रवृत्तिसामान्ये च कार्यताज्ञानत्वमान्यौतिनक मि ४
श्चिद्दोषः। न चैवं लाघवादिष्टसाधनत्वविषयककार्यताज्ञानमेव प्रवृत्तिसामान्ये हेतुरिति वाच्यं॥ नित्येतदभावा
त्॥ साध्यत्वसाधनत्वयोर्विरोधेनैकस्य कस्यचित्कृतिसाध्यत्वे इष्टसाधनत्वयोर्नानामं नवाद्य कथमनयोर्वि
रोध इति चेदित्थं॥ साधनत्वं हि सिद्धधर्मः॥ अपिशावस्थात् कार्यानुत्पत्तेः। साध्यत्वं चासिद्धधर्मः सिद्धतादशा
यां तदभावात्॥ न च कदाचित् सिद्धमसिद्धं च येनैकदा कृतिसाध्यमिष्टसाधनं च स्यादिति॥ अत्रोत्तरं नैयायि
काः। इष्टसाधनताविषयकं कृतिसाध्यताज्ञानमेव लाघवात्प्रवर्तकं॥ नहीष्टसाधनताज्ञानजन्यकार्यताज्ञा
नादिगौरवात्॥ न च नित्ये इष्टसाधनताज्ञानासंभवः फलाभावादिति वाच्यं॥ नित्येपि दुरितक्षयः फलं श्रुतेः॥ यत्र
च फलश्रुतिर्नास्ति तत्र विश्वजिन्न्यायात् स्वर्गः फलं प्रत्यवायपरिहारो वा॥ न चैवं फलकामनाधीनकर्तव्यत्वे का
म्यत्वं स्यान्न तु नित्यत्वमिति वाच्यं॥ नहि फलकामनानधीनकर्तव्यत्वं नित्यत्वं। किं तु यदकरणे प्रत्यवायस्तत्त्वं
तच्च कामनोपाधिकर्तव्यत्वेप्यक्षतमेव। न चैवं फले यदा कामना नास्ति तदा संध्यावन्दनादौ प्रवृत्तिर्न स्या
दिति वाच्यं। इष्टत्वात्॥ नहि प्रयोजनमनुद्दिश्य मन्दोपि प्रवर्तते॥ न चैवं कामनाधिकारिविशेषणं स्यात्॥

वि॰ श्री॰ तथा च यदा फले कामना नास्ति तदा पुरुषस्याशुचेरिवानधिकारित्वान्नित्याकरणेऽपि प्रत्यवायो न स्यादिति चेत्॥
यदि तत्र प्रत्यवायः प्रामाणिकस्तदा तर्हि कामनाधिकारिविशेषणं न तु वेदबोधितमिष्टसाधनत्वमपि
प्रामाणिकं स्यात्। कल्प्यतां वा कामनेतरया वदधिकारवत्तामकरणे च प्रत्यवायहेतुरिति न किंचिदेतत्॥
न च साध्यत्वसाधनत्वयोर्विरोधः। एककामिन्याकेशादेः साधनत्वकृतिसाध्यत्वयोः सत्वात्॥ कथमन्य
था तदिष्टसाधनताज्ञानकालीने कार्यताज्ञाने पाकादौ प्रवर्त्तेतेति॥ कृतिसाध्यत्वे च बलवदनिष्टा
ननुबंधित्वं विशेषणीयं नातो मधुविषसंपृक्तान्नभोजने कृतिसाध्यत्वेन सुखसाधनत्वेन च ज्ञानेपि
प्रवृत्तिः। बलवदनिष्टाननुबंधित्वेनाग्रहात्॥ यदा च बलवदनिष्टाननुबंधित्वेन ज्ञायते तदा प्रवर्त्तत एव॥
एवं च बलवदनिष्टाननुबंधीष्टसाधनत्वे सति कृतिसाध्यताविषयकं ज्ञानं प्रवर्त्तकं विध्यर्थो। बलवद
निष्टाननुबंधीष्टसाधनत्वे सति कृतिसाध्यत्वं॥ अत एव कलंजभक्षणस्येष्टसाधनत्वे सति कृतिसाध्य
त्वेपि बलवदनिष्टाननुबंधित्वाभावाद्विशिष्टाभावोऽस्तीति न कलंजं भक्षयेदिति विध्यर्थनिषेधनुपप
द्यते॥ कथं तर्हि श्येनेनाभिचरन्यजेदित्यत्र विधिप्रवृत्तिः॥ श्येनस्य हिंसात्वेन नरकहेतुरूपबलवदनिष्टानु
बंधित्वादिति चेन्न॥ श्येनो हि वधसाधनं न तु नरकसाधनं मानाभावात्॥ श्येनाद्धि वधो वधाद्धि नरके
सितिन तत्रास्ति ज्ञाने प्रवृत्तिः॥ ननु श्येनो मरणानुकूलव्यापारत्वेन हिंसा सा च नरकजनिकेति चेन्न॥
न हि मरणानुकूलव्यापारमात्रं हिंसा कूपादौ विनष्टे गवि तत्कर्तुर्गोवधकर्तृत्वप्रसंगात्॥ नापि मरणा १२४

द्देशेनानुष्ठीयमानत्वे सतीति विशेषणीयत्वात्॥ गंगायां मरणमुद्दिश्य कृताग्निसंध्यस्नावपाठादेरपि तत्वाप
त्तेः। अदृष्टाद्वारा मरणानुकूलत्वं विवक्षितमिति चेत्। कथं तर्हि श्येनस्य हिंसात्वमिति॥ न व्यासक्तेः॥ बलव
दनिष्टाननुबंधीष्टसाधनत्वे सति कृतिसाध्यताज्ञानत्वेन कृतिसाध्यत्वे सति बलवदनिष्टाननुबंधीष्ट
साधनताज्ञानत्वेन वा बलवदनिष्टाननुबंधि कृतिसाध्यत्वे सतीष्टसाधनताज्ञानत्वेन वा हेतुत्वेऽत्र
विनिगमनाविरहः॥ अस्तु तेनापि रूपेण हेतुत्वमिति चेत्। तर्हि कार्यताज्ञानत्वादिनैव हेतुतास्तु लाघवा
त्। वस्तुतस्तु कृतिसाध्यताधीत्वेनैव चिकीर्षां प्रति हेतुत्वं॥ नन्वेवमिष्टाजनकेपि चिकीर्षा स्यादिति चे
त्। स्यादेव। सुखादौ दुःखाजनकत्वेन ज्ञाते मंडूकचूर्णादौ चिकीर्षा स्यादिति चेन्न॥ उपायेच्छायामन्य
सामग्र्यभावात्॥ कैयं सामग्रीति चेदिष्टसाधनताज्ञानं बलवदनिष्टाननुबंधित्वज्ञानं च॥ बलवदनि
ष्टसाधनताज्ञानं प्रतिबंधकं। इष्टसाधनत्वं च विद्यमानेच्छाविषयो यस्तत्साधनत्वं इच्छाविषयत्वं च स्वेच्छ
यत्तद्विशेषणं न तु तस्यापि ज्ञानं कारणं। एवं च यदा सुखादाविच्छा पाकादौ च सुखसाधनताधीस्तदापा
कादाविच्छेति ध्येयं॥ विध्यर्थोऽपीष्टसाधनत्वं। कृतिसाध्यत्वं बलवदनिष्टाननुबंधित्वं च न तु विशिष्टं॥
विशेषणविशेष्यभावे विनिगमकाभावात्। न कलंजं भक्षयेदित्यत्र कृतिसाध्यत्वेष्टसाधनत्वयोर्न न
ञर्थान्वयः। तस्य कार्यत्वादिष्टसाधनत्वाच्च॥ किं तु बलवदनिष्टाननुबंधित्वस्य। श्येनेनाभिचरन्यजे

=यत्तु नर्थं च नात्मा कृतत्र चान्यत्र च प्राप्तुयात्तत्रेतरनिवृत्तिफलः =विनापि च यत्र प्राप्तिः

=कोविधिः॥३॥ =अतो नात्र प्राप्तिप्रदर्शकविधिः॥

सि॰मं॰ दित्यत्र बलवदनिष्टाननुबन्धित्वस्यनान्वयो बाधात्॥ इष्टसाधनत्व कृतिसाध्यत्वयोस्त्वन्वयः स्यादेवाबाधा
दिति संक्षेपः॥ ११ सोयं विधिस्त्रिविधः॥ अपूर्वविधिनियमपरिसंख्याभेदात्॥ तदुक्तं विधिरत्यन्तमप्राप्तौ नियमः
पाक्षिके सति॥ तत्र चान्यत्र च प्राप्तौ परिसंख्येति कीर्त्यत इति॥ उदाहरणानि व्रीहीन् प्रोक्षति व्रीहीनवहंति पंच
पंचनखा भक्ष्या इत्यादि॥ अत्र गुरवः॥ नेष्टसाधनत्वं विध्यर्थः स्वर्गकामो यजेतेत्यनेन विधिना बोधयि
तुमशक्यत्वात्॥ तथाहि॥ स्वर्गकामस्येष्टसाधनं याग इत्यनेन बोध्यं॥ इष्टं चात्र काम्यत्वेनोपस्थितः स्व
र्ग एव न चेदृशार्थे॥ साक्षात्साधनत्वस्याश्रुविनाशित्वेनासंभवात्॥ न च परंपरया स्वर्गसाधनत्वे बोधे॥
परंपराघटकापूर्वानुपस्थितेः॥ नापि कार्यत्वं स्वर्गकामिकार्यत्वस्य यागे बोधयितुमशक्यत्वात्॥ तथाहि॥
शाब्दे योग्यताज्ञानं हेतुः॥ योग्यता चान्वयप्रयोजकरूपवत्त्वं॥ अत एव सेकान्वयप्रयोजकं द्रवत्वं जलेस्तीति त
द्योग्यं॥ प्रकृते च कामिकार्यत्वान्वये इष्टसाधनत्वमन्वयप्रयोजकं न चेतद्गृहीतुं शक्यमित्युक्तं॥ तस्मा
त्कार्यमपूर्वमेव विध्यर्थः॥ तस्मिंश्च यागस्य विषयतयान्वयः॥ न च पूर्वं स्वरूपेणानुपस्थितत्वात्तत्र
शक्तिग्रहोऽनुपपन्नः॥ अथ कार्यत्वेन कार्यसामान्य एव शक्तिग्रहः योग्यतावशाच्चापूर्वस्य लाभः॥
न हि यागविषयकमन्यत्कार्यं संभवतीति चेन्न॥ स्वज्ञानादृश्यपि संभवात्॥ उच्यते॥ कार्यता वत्स्वर्गका =अपूर्वं
मस्यान्वयो नियोज्यः नियोज्यत्वं च लक्षणः॥ तत्र कामी नियोज्यः नियोजकं च कार्यं॥ अतः कार्यं निया ॥२५॥

मकत्वेन स्वर्गकामस्यान्वयः॥ नियोज्यकत्वं च तत्काम्यकार्यतया प्रतीयमानत्वं॥ अत्र चान्वयप्रयोजकं काम्य
साधनत्वं॥ न हि कामी काम्यादन्यत्काम्यसाधनत्वेनाज्ञातं कार्यतया प्रवेति॥ न च काम्यासाधनं काम्य
साधनत्वेन ज्ञायते॥ अन्यथाख्यातिरनभ्युपगमात्॥ न च ज्ञानं काम्यस्य स्वर्गस्य साधनं संभवतीति॥ अ
तो योग्यताबलाद्यागविषयकं कार्यं स्वर्गकामीयं स्वर्गकामो यागविषयककार्यवानित्येवं यो नु संबो
न वन्योग्यतयापूर्वमालंबते॥ एवं च काम्यकृतसाधाकिलिङ् निषेधे चापूर्वमाह लोके च पचेदित्यादा
वसर्वनात्पर्यो संभवात्कार्यत्वेलक्षणयाहुः॥ अत्रोच्यते॥ कार्यत्व एव विधेः शक्तिर्लाघवात्॥ न तु कार्यत्व
विशिष्टे॥ न च यागे स्वर्गकामकार्यत्वान्वयासंभवो बाधकाभावात्॥ न च योग्यताज्ञानविरहो बाधः॥ न ह्य
न्वयप्रयोजकरूपवत्त्वं योग्यता॥ संकोचान्वयितावच्छेदकत्वात्॥ किंतु प्रकृतसंसर्गवत्त्वं तस्य च संशयसाधा
रणं ज्ञानं हेतुः॥ न च यागे स्वर्गकामकार्यत्वसंशयोपि न भवतीत्येवं स्यात्॥ यद्यौ केइष्टसाधनत्वेन विध्य
र्थः॥ यागे तस्य लिङा बोधयितुमशक्यत्वादिति॥ तदपि न॥ बाधकाभावात्॥ ननु बाधकमितिचेन्न॥ सा
क्षात्परंपरासाधारणस्य साधनतासामान्यस्य लिङा बोधनात्॥ यथा रूपवान्घट इत्यत्र नीलत्वादि
रूपस्य रूपसामान्यज्ञानं॥ अथ कृविशेषबाधे शाब्दं सामान्यज्ञानं नदितरविशेषकप्रकारतानि
यतं॥ यथा घटेन जलमाहरेत्यत्र छिद्रेतरत्वेन घटज्ञानं॥ अतो न सामान्यधीपरंपरात्वप्रकारकज्ञानं वाच्यं॥

यथाम्नो रेदानीं घटरोदी तद्दृश्य ... पदभ्रवलिपत्तेद् ... बहिरिन्द्रियजन्यते ...
बहिरिन्द्रियजन्यते देयौ ॥ अयं भूतार्थवादः ३

सि॰मं॰ तद्यन्नसंभवति द्वारानुपस्थितेरिति चेन्न ॥ घटेन कुलमारुरेत्यत्र हि वस्तुगत्या यः छिद्रेतरः योग्यतया
तदन्वयः न तु तदितरत्वेन ज्ञानं तदुपस्थापकपदाभावात् ॥ न च लक्षणया तदुपस्थितिर्माना
भावात् ॥ आसत्तौ वा तत्रापि मानाभावात् अन्यसाधनत्वप्रकारेण वान्वयः किं न स्यात् ॥ अयोग्यताज्ञानवि
रहो बाधकः तथा हि ॥ आशुविनाशिनः कालान्तरभाविफलजनकत्वे फलसमयपर्यन्तस्थायिव्यापा
रजनकत्वमन्वयप्रयोजकम् ॥ न चेह तथा ज्ञानं संभवतीति चेन्न ॥ अन्वयप्रयोजकरूपवत्त्वस्य योग्य
ताया निरासात् ॥ नन्वेवं कथमपूर्वं मानमिति चेत् ॥ आशुविनाशिनः कालान्तरभाविफलजनकत्वस्य
व्यवस्थापयितुं व्यापारत्वव्याघातः ॥ तदुक्तमाचार्यैः ॥ चिरध्वस्तं फलायालं न कर्मातिशयं विना ॥ संभो
गो निर्विशेषाणां न कृतैः संस्कृतैरपि ॥ मूलहारस्य ॥ धर्मिकल्पनातो धर्मकल्पना या लघुत्वात् यथा गौर
वस्थापि संयुक्तं न लक्ष्यं न चैवमिदानीं यागप्रत्यक्षापत्तिः ॥ आत्मविशेषगुणतानां द्वितीयक्षणोत्प
न्नायादित्याहुः तन्न ॥ इदानीं न यागरूपमिति प्रत्यक्षविरोधात् विधिविप्रतिपन्नोऽर्थवादः ॥ स च त्रिविधः गुण
वादोऽनुवादो भूतार्थवादश्चेति तदुक्तं ॥ विरोधे गुणवादः स्यादनुवादोऽवधारिते । भूतार्थवादस्तद्धानादर्थवा
दस्त्रिधा मतः ॥ सोऽयं शब्दो नित्यः ... गकारः न तु गकार इति प्रतीतेः ॥ अत्र गुरवः ॥ नित्यः शब्दो ...
कत्वात् ... ॥ न चाप्रयोजकं सोऽयं गकार इति प्रत्यभिज्ञानस्यान्यथानुपपत्तेः ॥ न चायं भ्रमो बाधका ॥२६॥

यथा प्रत्यक्षादि लोपः २ यथा अग्निहोत्रं जुहोति २

भावात् ॥ न चोत्पन्नो गकार इति प्रतीतिर्बाधिका ॥ तस्य व्यंजकवायूत्पत्त्यादिविषयत्वादित्याहुः ॥ तन्न ॥ गका
रगतत्वेनोत्पत्तिप्रतीतेः ॥ न चासौ भ्रान्तिः बाधकाभावात् ॥ प्रत्यभिज्ञानं बाधकमिति चेत् न एवं सामा
धितायामिति न स्यात् ॥ न ह्यत्र विनिगमकमस्ति ॥ नन्वेवं विनिगमकं नास्ति विनाशादिप्रत्ययस्यैव
बाधितत्वं कुत इति चेन्न ॥ उत्पत्तिविनाशप्रत्यययोर्बाध्यबाधकत्वे न पक्षस्य प्रत्यभिज्ञानमात्रस्य बाध्य
त्वकल्पनायां लाघवात् ॥ अन्यत्रापि विनिगमकाभावात् अन्यो रेखा भ्रमात् ॥ कथमिति चेदित्थं ॥ प्रत्य
भिज्ञानस्य गत्वावच्छिन्नभेदाभावविषयत्वात् ॥ तथा हि ... गकारोऽयमिति स्यान्न तु सोऽयमिति ...
न्ना ॥ सोऽयमित्यस्य तत्त्विगत्वावच्छिन्नाभिन्नोऽयमित्यर्थात् ॥ गकारोऽयमित्यत्र गत्वेन तद्व्यक्तिज्ञानव
त्वात् ॥ नातो ... तथाऽसति ... नीयोऽयमिति स्यादिति चेन्न ॥ गत्वजातिज्ञानवत्त्वासमानादित्याहुः
... ॥ शब्दोऽनित्यः ... ॥ तदपि नो ... ॥ शब्दस्य द्रव्यत्वे
... ॥ शब्दो द्रव्यं ... बहिरिन्द्रियग्राह्यत्वात् घटवदिति चेन्न ॥ अप्रयोजक
मानाभावाच्च ॥ ... अन्ये तु वर्णा नित्याः ...
त्वात् ॥ शब्दस्य नीरूपद्रव्यत्वेन बहिरिन्द्रियग्राह्यत्वापत्तेः ॥
स्फोट इत्याहुः ॥ तदप्यत एव नि... ॥१७॥

सि॰भ॰ दृष्टांतासिद्धिश्च ॥ नहि वर्णान्यः स्फोटः अन्यः कः प्रमाणसिद्धोस्ति ॥ नन्वस्ति सः ॥ तथाहि ॥ पदानां वर्णात्मकदेव
रूपाणां आनंतर्यविनाशितया मेलनासंभवात् पदप्रत्यक्षत्वं तावत्किं च ॥ तथा च पदप्रत्ययः कुतोर्थप्रत्य
यः स्यात् अस्माद्वर्णाभिव्यंग्यः पदस्फोटः कश्चित्कल्प्यो यतोर्थप्रत्यय इति ॥ तदयुक्तं ॥ नहि स्फोटः
स्यात् वर्णव्यंग्यः तावत् तां मध्य्यर्थं स किंचिद्वर्णव्यंग्यो वा ॥ तावद्वर्णाभिव्यक्तिव्यंग्यो वा ॥ नाद्यः ॥ आशुवि
नाशिनां क्रमिकाणां तेषां मेलनासंभवात् ॥ न द्वितीयः ॥ घकारमात्रोच्चारणेपि घटपदस्फोटप्रत्यय
प्रत्ययापत्तेः ॥ वर्णांतरवैकल्याच्च ॥ नोत्पत्त्यादसंभवात् ॥ अथ पूर्वपूर्ववर्णगोचरसंस्कारसह
कृतचरमवर्णोपलंभस्तद्व्यंजक इति चेत्तर्हि स एवार्थप्रत्यायकोस्तु कृतं स्फोटेन ॥ अथ प्रतीतिबला
त्सिद्धिरिति चेन्न तस्याः क्रमविशेषवत्तावद्वर्णगोचरत्वात् ॥ तावद्वर्णगोचरप्रत्यय एव न भवती
ति चेत्तावद्वर्णानुभवसंस्कारात्मस्मृत्यालंबनरूपतावद्वर्णगोचरस्मरणसंभवात् ॥ ननु तावद्वर्ण
मात्रं न पदं अर्थोपस्थापकत्वात् ॥ अन्यथा नदीदीनयोरविशेषापत्तेः ॥ किं त्वानुपूर्वीविशेषवि
शिष्टतावद्वर्णरूपं ॥ न च तत्प्रत्ययः संभवतीति चेन्न ॥ घोत्तरत्वं हि घटस्यानुपूर्वी
सा अस्ति च तस्य प्रत्यक्षं घोत्तरघटश्रुतवानस्मीति प्रतीतिरिति दिक् ॥ नन्वर्थापत्तिरपि मानांतरं ॥ (सू॰५२०)

तथाहि ॥ पीनो देवदत्तो दिवा न भुंक्ते इति प्रत्यक्षानंतरं दिवाभोजिनः पीनत्वं रात्रिभोजनमंतरेणानुपपन्नमिति
कल्पयति ॥ न चात्र प्रत्यक्षादि प्रमाणं किं त्वनुपपत्तिज्ञानं सैवार्थापत्तिरिति चेन्न ॥ तथाहि ॥ देवदत्तो रात्रौ भुं
क्ते दिवाभुंजाने सति पीनत्वात् ॥ यन्नैवं तन्नैवं यथा दिवाऽभोजीति केवलव्यतिरेकिणैवोपपत्तेः ॥ अर्थापत्ति
पदं चैकवज्जव्यतिरेकिण एव नामांतरमिति संक्षेपः ॥ अविदितकर्तृकः शब्दविशेष इति वेदनाम ॥ स यदि मा
नं तदा शब्द एवेति चेत् प्रमाणमेवेति न तत्र यथापि न मानांतरमिति ॥ सिद्धं चत्वारि प्रमाणानीति ॥ ननु
सर्वेषां प्रमात्वं सिद्धं स्यात् तदेव तावन्न सिद्धं ॥ नहि तत्प्रत्यक्षं ज्ञानस्यातीन्द्रियत्वात् ॥ अन्यथा ज्ञानवत्ता
नां ज्ञानमेव स्यान्न तु विषयांतरसंचार इति ॥ अत्र गुरवः ॥ स्वप्रकाशमेव ज्ञानं घटादिकमिव स्वात्मा
नं स्वाधिकरणमात्मानं च विषयीकरोति ॥ अत एव सर्वमेव ज्ञानं घटमहं जानामीत्याकारकं ॥ इत्थं च ज्ञान
स्य मितिमातृमेयविषयत्वात् त्रिपुटीप्रत्यक्षत्वमिति प्रवाद इत्याहुः ॥ तन्न ॥ चक्षुरुन्मेषघटज्ञानादिनास्यात्म
नो विषयीकर्तुमशक्यत्वात् ॥ चाक्षुषादिज्ञाने विषयप्रत्यासत्तिकर्षयोरपि हेतुत्वात् ॥ न चोत्पद्यमानं ज्ञा
नं एवमस्ति सन्निकर्षः ॥ कथं वा चाक्षुषाद्यविषयकं ज्ञानं जायेत ॥ चाक्षुषादिज्ञाने रूपवत
एव रूपस्य योग्यत्वात् ॥ अन्यथा आकाशस्यापि चाक्षुषापत्तिः ॥ मैवमस्तु ॥ ज्ञानं तावत्स्वविषये ज्ञात
तारूपं फलं जनयतीति निरूढं ॥ तच्च प्रामाण्येक्षानमित्याहुः ॥ तदपि न ॥ ज्ञाततायाः निरस्तत्वात् ॥ ७

प्रि॰म॰

ज्ञानरूपस्य साध्यस्याप्रसिद्धावनुमेयाच्च॥ उच्यते॥ मनसैव ज्ञानं गृह्यते योग्यत्वात्। न चैवं तज्ज्ञानप्रत्यक्षत्वाद्वेतज्ज्ञा
नमपीत्यनवस्था विषयान्तरसंचारसामग्र्या प्रतिबंधेन कस्यचिज्ज्ञानस्य मनसाऽग्रहणात्। तस्य प्रतिबंधक
त्वे किं मानमिति चेत् फलानुदय एवेति संक्षेपः॥ तथापि तस्य प्रामाण्यं केन गृह्यते न तदनुमानेन गृहीतुं
शक्यते साध्याप्रसिद्धेः॥ अत्र नव्याः॥ ज्ञानतया ज्ञानानुमितिः क्रियमाणा प्रामाण्यमपि विषयीकरोतीत्या
हुः॥ तन्न॥ ज्ञानतया हि ज्ञानमात्रस्य व्याप्तिर्गृहीता। प्रमात्वविशिष्टस्य वा। नाद्यः। ततो ज्ञानमात्रेणसि
द्धेर्न तु तत्प्रमात्वस्यापि॥ साध्यतावच्छेदकरूपेण साध्यव्याप्त्यासिद्धत्वात्। न तु रूपान्तरेण॥ अन्य
था वह्निव्याप्यो धूम इति ज्ञानाद्द्रव्यत्वेन दहनसिद्ध्यापत्तेः॥ नान्त्यः। व्यभिचारात्। साध्याप्रसिद्धेश्च॥ गुरवस्तु स्व
प्रकाशमहिम्ना स्वमिव स्वप्रामाण्यमपि सिध्यतीत्याहुः॥ तन्न॥ स्वप्रकाशताया अप्रसिद्धेः॥ किंचैवं ज्ञानप्रा
माण्यसंशयो न स्यात्॥ ज्ञानग्रहे प्रामाण्यनिश्चयात्॥ निश्चिते च संशयायोगात्॥ अग्रे तु स्वप्रकाशप्रामाण्य
तो व्याघातात् धर्मिज्ञानाभावाच्च॥ प्रमाणधर्मवत्तया धर्मिज्ञानस्यान्वयव्यतिरेकाभ्यां संशयहेतुत्वावधा
रणात्॥ मिश्रास्तु॥ तद्विशेष्यकत्वे सति तत्प्रकारकत्वं प्रामाण्यं॥ तच्च प्रथमानुव्यवसायेनैव गृह्यते॥ त
था हि॥ घटत्ववानित्यव्यवसायेनोपनीते अत्र तद्विशेष्यकता संसर्गरूपा॥ ज्ञानेन मनसा गृह्यते॥ १२८॥

विशेषणस्य तद्वृत्तेः पूर्वमनुपस्थितत्वात्॥ न च मनसो बहिरर्थप्रकाशासामर्थ्यं॥ उपनयसहकारेण तस्य
बहिरर्थप्रकाशकत्वात्॥ कथमन्यथा कविकाव्यमलं तं ज्ञानाद्व्यवा अनुव्यवसायविषयमाने घ
टत्वमपि व्यवसायेनोपनीतं॥ अतस्तत्प्रकारकतो विषयतावत्तु ग्रहे तिष्ठत्येयस्य कत्रग्रहे गृहीतं प्रामा
ण्यमिति॥ तदपि न॥ एवं हि तद्विशेष्यकत्वं तत्प्रकारकत्वं च गृहीतं। न चैतावद्वत्प्रामाण्यं। किंतु तद्वद्वि
शेष्यकत्वविशिष्टं तत्प्रकारकत्वं॥ न तद्वद्विशेष्यकत्वे वैशिष्ट्यमनुव्यवसायेन गृहीतुं शक्यते। तद्व
द्विशेष्यकत्वस्य पूर्वमनुपस्थितेः॥ संसर्गविधया विशेष्यताप्रकारताश्च भासते॥ किंचैतदपि न प्रा
माण्यं॥ वह्निमुल्योगुञ्जा च वह्निरिति भ्रमेऽपि व्याप्तेः॥ अस्ति हि तत्र वह्निविशेष्यकत्वे तत्प्रकारकत्वं चाधि
कुतद्विशेष्यत्वावच्छेदेन तत्प्रकारकत्वमित्यर्थको। न चावच्छेद्यावच्छेदकभावः प्रथमं गृहीतुं शक्यः॥ त
द्विशेष्यकत्वस्य पूर्वमनुपस्थितेः॥ अत्रोच्यते॥ प्रामाण्यं प्रथमानुव्यवसायेन न प्रामाण्यग्रहः॥ द्वि
तीयेन तु स्यात्॥ तद्विशेष्यकत्वस्य प्रथमानुव्यवसायेनोपस्थितेः॥ न चैवं प्रामाण्यस्यानुव्यव
सायगम्यत्वे प्रामाण्यसंशयो न स्यादिति वाच्यं॥ दोषवशाद्यत्र प्रामाण्ये नानुव्यवसायेन गृहीतं॥

प्र॰मं॰ तत्र संशयसंभवात्॥ अथा पुरुषत्वसंशयोत्पत्तिं न स्यात्। तस्य च स्वरूपेण ग्रहात्॥ न चैवं प्रामाण्यस्य
स्वतो ग्राह्यत्वभंगः॥ असति प्रतिबंधके यावदाश्रयानुव्यवसायग्राह्यत्वं हि स्वतस्त्वं न तु स्वतो ग्राह्यत्वं
॥ तच्च न प्रथमानुव्यवसायेनाग्रहात्॥ एवं च साध्यप्रसिद्धौ अनुमानमपि न कारकं। तथा हि इ
दं पुरुषज्ञानं प्रमाकरणमिति। पुरुषज्ञानत्वात्॥ संप्रतिपन्नवत्॥ यद्वा पन्नैवं तन्नैवं यथा घट
इत्यन्वयव्यतिरेकी॥ अन्ये तु प्रथमस्य प्रामाण्याभाव एव॥ प्रामाण्ये व्यतिरेकिणः साध्य॥ न च सा
ध्याप्रसिद्धिः॥ न हि व्यतिरेकिणां साध्यं हेतौ व्याप्तिर्गृह्यते॥ किं तु साध्याभावे हेत्वभावस्य। किं
तदप्रसिद्ध्या॥ न च साध्याप्रसिद्धौ तदभावाप्रसिद्धिः॥ प्रतियोगिज्ञानस्याभावज्ञाने हेतुत्वादि
ति वाच्यं॥ तस्य प्रतियोगिरूपत्वात्॥ न च प्रतियोगिज्ञानस्याभावज्ञाने कारणं। मानाभावात्॥
अभावत्वादिना प्रत्यक्षे व्यभिचाराच्च॥ अभावत्वेन प्रत्यक्षवारणाय इंद्रियसंबद्धविशेषण
तायां विशिष्य कारणत्वस्वीकारात्॥ एवं च व्यापकतया हेत्वभावो गृहीतः स्तेन हेतुना तदभा ॥२९॥
वः सिध्यतीति॥ न च साध्याज्ञाने कथं तद्विशिष्टज्ञानरूपा अनुमितिः। अप्रामाण्याभावेवि

शेष्यकाया एवानुमितिरूपगमात् इत्याहुः॥ आस्तां तथापि तद्वति तत्प्रकारकत्वग्रहे केनोपगतः॥ किं च प्र
शादिमति पुरुषज्ञानत्वं केन ग्राह्यं॥ अनुव्यवसायेनेति चेत्॥ तर्हि पुरुषत्ववति तत्प्रकारकत्वग्रहः॥ केन वार्य
ते॥ यतस्तमपहाय एष कुत्र स्यादिति। अन्योक्तप्रकारकज्ञानत्वमेव प्रामाण्यं॥ न च रजतत्वप्रकारक
शुक्तिज्ञानमपि प्रामाण्यं स्यात्॥ तदसिद्धेः॥ न हि यत्र यन्नास्ति तत्र तत्प्रकारकज्ञाने मानमस्ति कथं त
र्हि शुक्तौ इदं रजतमिति व्यवहार इति चेत्॥ तत्र व्यवहारे रजतत्वासंसर्गाग्रहात्॥ रजतत्वप्रकारि
शुक्तौ प्रवृत्तिरपि तदिच्छाधीनेच्छादेः रजतत्वस्यासंसर्गाग्रहात्॥ अथ रजतत्वप्रकारकप्रवृत्तौ रजतत्व
प्रकारकत्वज्ञाने प्रमात्वस्य कारणत्वं क्लृप्तं॥ तथा च तेन विनाभावे शुक्तौ प्रवृत्तिः स्यादिति चेन्न॥ तत्रापि र
जतत्वासंसर्गाग्रहस्य हेतुत्वात्॥ अथासंसर्गाग्रहस्याविशेषात् केचित्संवादिनी प्रवृत्तिः क्वचिद्विसंवा
दिनीति कुतो नियम इति चेन्न॥ तद्वति तदसंसर्गाग्रहस्य तत्प्रकारकसंवादिनी तदभाववति तदसंसर्गा
ग्रहस्य तत्प्रकारकविसंवादिनीप्रवृत्तौ हेतुत्वात्॥ अत्रोच्यते॥ नाद्य इव रजतत्वसंसर्गग्रहो रजतत्वप्र
कारकप्रवृत्तौ हेतुः॥ न तु रजतत्वासंसर्गाग्रहो गौरवात्॥ न च शुक्तौ तदसंभवः॥ विशेषणज्ञानाद्विशेष्य
॥ इंद्रियसन्निकर्षः तयोरसंसर्गाग्रहश्चेत्येव हि विशिष्टज्ञानसामग्री॥

न्या०मं०

अस्ति यत्रापि विशेषणस्य रजतत्वस्य ज्ञाने विशेष्यभूतेन्द्रियसन्निकर्षस्तयोरभेदसंसर्गग्रहश्च ॥ अथ रज
तेन्द्रियसन्निकर्षविरहात्कथं तत्प्रकारकं प्रत्यक्षमिति चेत् ॥ सन्निहितेयं रजतमित्यत्रेमं रजतमम
चायस्य ॥ अन्यत्र ज्ञानस्य सन्निकर्षस्य सत्वात् ॥ ज्ञानस्य सन्निकर्षत्वे किं मानमिति चेत् तत्तत्
प्रकारकप्रत्यक्षमित्येव ब्रूमः ॥ तत्प्रकारिका प्रवृत्तिरिति संक्षेपः ॥ ॥छ॥ श्रीः ॥ श्रीमत्कृष्णाचार्यचं
द्रमौलिविरचिता न्यायसिद्धान्तमञ्जरी समाप्ता ॥ ॥श्रीशिवार्पणमस्तु ॥ ॥ ॥ ॥रामाय नमः ॥
अमरावतीवास्तव्यमोढज्ञाति[illegible] भट्टश्रीजोगीसुतरघुनाथेन लिखिता मंजरी ॥ पुस्तकमिदं
... ॥ भवानीशंकरार्पणमस्तु ॥ छ ॥ श्रीः ॥ ... व्याप्त्यादि ... व्याप्ति
वारणाय ... स्वपदं ... पुनरपि ... व्याप्तिवारणार्थं ... पदं । इदि ... योगमादाय
लक्षणसमन्वयः । ... योगो ... न भवति ... अव्याप्तिः ... पञ्चस्वपदं । ...
तस्यान्यजनकं नास्ति । ... न वस्तज्ञानसामान्तानि ... वारणाय मात्रपदं । ...
दोषा न साधीनोपस्यात् । विशिष्टबुद्धित्वमादाय अव्याप्तिवारणाय जातिपदं । विशिष्टबुद्धित्वं न जातिः । अनु
मितावतिव्याप्तिवारणाय ... पदं प्रत्यक्षात्कारे अनुमितिसम्बन्धस्य ... घटे अतिव्याप्तिवारणार्थं च
... पदं घटे ज्ञानसं नास्ति ।